
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M772 विषय धर्मशास्त्र

नाव. शिवपूजिकाविधी (mss)

लेखक/लिपीकार कमलाकरभट्ट

पृष्ठ 72 काळ – पूर्ण/~~अपूर्ण~~

श्रीगणेशाय नमः ॥ श्रीरामाय नमः ॥ महेशं महत्सना
राध्य जलोत्सर्गमथोक्तवान् ॥ प्रतिष्ठां सर्वदेवानां नीलकंठो वद
स्व मे ॥ १ ॥ तत्र तत्कालः विप्रमुधर्मोत्तरे ॥ चैत्रे वा फाल्गुने वापि
ज्येष्ठे वा माधवे तथा ॥ माघे वा सर्वदेवानां प्रतिष्ठा शुभदा सितोरि
क्ता न्यतिथिषु स्यात्सा वारे भौमान्यके तथेति तत्रैव ॥ आषाढे द्वे
तथा मूलमुत्तरात्रयमेव च ॥ ज्येष्ठाश्रवणरोहिण्यः पूर्वाभाद्रप
दा तथा ॥ हस्तोश्विनी रेवती च पुष्यो मृगशिरस्तथा ॥ अनुराधा
तथा स्वाती प्रतिष्ठासु प्रशस्यते इति नारसिंहे ॥ तथा मेहाश्विनो
मास उत्तमः सर्वकामदः ॥ देवी देतत्र सदा शाकंपासु नापि प्रतिष्ठि
ता ॥ भवेत्फलदा पुंसां कर्के च वृषस्थिते ॥ न तिथिर्न च नक्षत्रं नो

१

पवासोत्रकारणं॥ मातृभैरववाराहनारसिंहत्रिविक्रमाः। महिषासुरहं
त्र्यश्च स्थाप्या वै दक्षिणायने॥ क्वचिन्निषेधः॥ आर्द्रादिके स्वातिविराम
कालेन क्षत्रवृंदे दशके स्थिते वै॥ विवाहचौलव्रतबंधदीक्षासु रक्षप्रतिष्ठा
दिनकार्यमेवेति॥ अथ संभाराः। अर्कादिग्रहसमिधां प्रत्येकमष्टत्र्यं
तं संक्षेपपक्षे। आज्यचर्वादि। लोकपालादियागाय पलाशादिसमि
धां प्रत्येकमष्टसहस्रमष्टशतं वा। पुष्पमालाः कुंकुमं कर्पूरः कस्तूरी चं
दनं॥ गुग्गुलः धूपदहनं। आरार्तिकं॥ घंटापादुकादर्पणं। बलिसाम
ग्री॥ पायसभक्ष्यभोज्यनैवेद्यं॥ होमार्थमाज्यतिलयवाक्षतफला
दिकं। प्रतिकुंडं विष्टराश्चत्वारः। प्रतिकुंडं स्रुक्स्रुवौ॥ आसनानि॥
त्रिसूत्री श्वेतोर्णासूत्रं। सर्वतोभद्रादिरचनाय श्वेतरक्तपीतनील

१

कृष्णवर्णाः स्नपनकलशाः पल्लवाः। कदलीस्तंभाः पताका दशध्वजा
श्च दश तेषां वेणुदंडाः। वज्रमौक्तिकवैडूर्यशंखस्फटिकपुष्परागेंद्र
नीलमहानीला इति रत्नाष्टकं। हरितालमनःशिलाभ्रकधूम्रांजन
माक्षिककोशीसस्वर्णमाक्षिकगैरिका इति धात्वष्टकं॥ तिलयवैंगो
धूमनीवारश्यामाकसर्षपव्रीहय इति बीजाष्टकं॥ सुवर्णरजतता
म्रलोहत्रपुसीसरागरीयास्वधात्वष्टकं। मधुपर्कपात्रं सौवर्णं ताम्रं
वा अर्घ्यपात्रं। शल्यैकद्वित्रिमाषसुवर्णशलाका स्थापनीयकल
शरत्नानि। षोडश द्वारकलशाः। अष्टौ लोकपालकलशाः। वेदिक
लशाश्चत्वारः। वास्तुमंडलकलशाः। कुंडकलशाः कुंडसंख्यया॥
निद्राकलशाः स्नपनकलशाः षट्चत्वारिंशत्। कलशासंख्यया शरा

मु०

२

वाणि॥ धारासहस्रान्वितौ कलशौ॥ गजाश्वरथ्यानवल्मीकसंगमकूल
ह्रदवराहोत्खातराजद्वारमृदः। मुरामांसीवचाकुष्ठशैलेयहरिद्रादा
रुहरिद्रासटीचंपकमुस्ताइतिदशसर्वौषधयः॥ पंचगव्यं पृथक्
पृथक् व्रीहि॥ यवतिलगोधूमनीवारश्यामाकमुद्गा इति सप्तधा
न्यानि। शय्यासोपस्कारा। श्वेतवस्त्रं। चामरं। विचित्रं। वितानं। त्र
योदुकूलपट्टाः ऋत्विग्वरणीसामग्री। स्त्रीलिंगवस्त्रयुग्ममित्यादि
संपादितसंभारो मूर्तिप्रतिष्ठादिनात्प्राक् सप्तमदिने पंचमदिने त्रि
दिने द्विदिने सद्यो वा प्रासादाग्रे मंडपं कृत्वा तन्मध्ये चतुरस्रं। पंचह
स्तां चतुर्हस्तां वा हस्तोच्छ्रितां वेदिं मंडपोत्तरे चतुर्द्वारं स्नानमंडपं त
त्र वेदिकात्रयं च कृत्वा। ततो यजमानः पत्न्या सह आचम्य प्राणान्

२

यम्य तिथ्यादिकं संकीर्त्य मम ब्रह्महत्यादिपापानि सक
लपापक्षयकोटिगुणसर्वयज्ञतपोदानतीर्थवेदपुराणपुण्यफलप्र
र्वक एकविंशतिसंख्यामातृकुलपितृकुलपत्नीकुलनरकोत्तारण
पूर्वकं वर्षकोटिसहस्रावच्छिन्नरुद्रलोकमहत्त्वलं दुर्भरकालिकमहा
पार्थिवजन्म भूरत्ने वसुर्भृत्यत्व ब्राह्मण्य विपुलभोग पूर्वकं प्रायो त
र कालिक योगाधुत्तर मोक्ष प्राप्तिकामः अस्मिन् शिवलिंगे देवक
लासांनिध्यार्थं श्रीपरमेश्वरप्रीत्यर्थं शिवप्रतिष्ठां करिष्ये तदंगभ
तं गणेशपूजनपूर्वकं स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदीश्रा
द्धं आचार्यब्रह्मसदस्यऋत्विग्वरणं जलाधिवासादिकं च करिष्ये॥
ततो वारुणीदीक्षाचारः दंपत्योरुत्तरीयद्वयांते सफलाक्षतग्रंथि

२

बंधः। देवस्यत्वेत्यादिमंत्रैस्तयोरभिषेकः। यदाबध्नंदाक्षायणेतिय

जमानकरेकुंकुमौक्षसूत्रबंधनं॥ स्वस्तिनइतीतिलककरणं। दधिक्रा

व्णाइतिदधिवंदनं। कांडात्कांडादितिदूर्वाभिमार्जनं। अक्षन्नमीमदंत

इत्यक्षतवंदनं। ततोक्षतानृगृहीत्वा। करोतुस्वस्तितेब्रह्मास्वस्तिचापि

द्विजातयः॥ सरीसृपाश्चयेश्रेष्ठास्तेभ्यस्तेस्वस्तिसर्वदा॥ ययातिर्नहु

षश्चैवधुंधुमारोभगीरथः॥ तुभ्यंराजर्षयः सर्वेस्वस्तिकुर्वंतुनित्यशः।

स्वस्तितेस्तुद्विपादेभ्यश्चतुःपादेभ्यएवच॥ स्वस्त्यस्त्वपादकेभ्यश्चानिसं

वेचमहामखे॥ इत्यक्षतानृहस्तेगृहीत्वा। संदीक्षितोसिनियमेनरक्षि

तव्यमितिगुरुर्वदेत्। व्रतेनत्वं०ध्रुवक्षेमेतिस्वस्वशाखामंत्रेणयज

मानाभिमंत्रणमिति। ततोगणपतिपूजनादिनांदिश्राद्धांतंकृत्वा

स्व

२

आचार्यादिवरणंकुर्यात्॥ तद्यथा॥ अस्मिन्शिवप्रतिष्ठाख्येकर्मणि

आचार्यत्वेनत्वामहंवृणे। इतिवृत्वा। आचार्यस्तुयथास्वर्गेशक्रादी

नांबृहस्पतिः॥ तथात्वंममयज्ञेस्मिन्नाचार्योभवसुव्रतेतिपठित्वाव

स्त्रालंकारादिदत्वाप्रार्थयेत्॥ मंत्रमूर्तिर्भवान्नाथसंसारोच्छेदकार

क॥ देवपूजाहृपिथास्याकुरुधर्मादितिंचर्का॥ प्रतिष्ठादिविधाव

स्मिन्कुरुकर्मयथोदितं॥ यथाशक्रस्यवागीशस्त्वाचार्यःसर्वक

र्मसु। तथामयात्वमाचार्योवृतोस्मिन्यज्ञकर्मणि॥ त्वत्प्रसादाच्चपूर्ण

स्यसमग्रंफलमाप्नुयां॥ संसारभयभीतेनअयंयज्ञःसुभक्तितः॥

प्रारब्धस्त्वत्प्रसादेननिर्विघ्नोमेभवेदिहेति॥ अस्मिन्कर्मणिब्रह्म

त्वेनत्वामहंवृणे॥ यथाचतुर्मुखोब्रह्मासर्वदेवनमस्कृतः तथात्वं

नः

सा

ममयज्ञेऽस्मिन् ब्रह्माभवद्विजोत्तमेतिपूर्ववत्पूजयेत्॥ अस्मिन् कर्मणि
सदस्येनत्वामहंवृणे॥ कर्मणामुपदेष्टारंसर्वकर्मविदुत्तमं॥ कर्मणिवे
दतत्वत्तंसदस्यंत्वामहंवृणइतिवृत्वापूर्ववत्पूजयेत्॥ अस्मिन् कर्मणि
नानागोत्रान् ब्राह्मणान्नानानामर्मणः भवतः ऋत्विजः वृणे। तेचद्वात्रिंश
षोडशाष्टौचतुरोवाऋत्विजः वृत्वातान्प्रार्थयेत्॥ भगवन् सर्वधर्म
ज्ञसर्वधर्मभृतांवर॥ विततेममयज्ञेऽस्मिन् ऋत्विक्त्वंभवसुव्रतेति॥
यदातुस्वल्पेप्येकाग्निवत्कार्यं॥ विलक्षणत्वाद्दतेनऋषिरितिमात्स्येत्वे
ककाग्निमात्रंतदाचार्यएववृणुयात्॥ आश्वलायनानांब्रह्माकृताकृ
तः॥ अस्ययागस्यनिष्पत्तौभवंतोऽभ्यर्थितामया॥ सुप्रसन्नाःप्रकर्तव्य
मेतत्कर्मयथोदितमिति॥ अस्मिन् कर्मणियेयेतुवृतागुरुमुखाम

या॥ सावधानाःप्रकुर्वंतुस्वंस्वंकर्मयथोदितमितिप्रार्थयेत्॥ तेनाष्टौ
होतारोऽष्टौद्वारपालाअष्टौजापकाश्चेतिपंचविंशतिः। अष्टौहोतारो
चत्वारोद्वारपालास्तावंतोजापकाश्चेतिसमदशवा। होतृजापकद्वार
पालाःप्रत्येकंचत्वारइतिगुरुणासहत्रयोदशवा। अशक्तौतुगुरुरेवै
कः। तदात्वग्न्यांतरीयकर्मलोपः। ततःआचार्यस्यस्वशाखयाअन्ये
षांयच्छाखीयंकर्मकुर्वंतितत्तच्छाखीयमधुपर्कः। अथजलाधिवासा
र्थंजलयात्रार्थंदेवप्रबोधनार्थंचगच्छेत्। अथजलयात्राविधिर्लि
ख्यते। श्रीवसिष्ठः। शांतिकंपौष्टिकंवापिजलयात्रांचतत्सुधीः। कुर
तयदिवामोहात्कर्मतस्यचनिःफलं॥१॥ तडागादिप्रतिष्ठासुदेवताथ
वनादिषु। लक्षहोमेकोटिहोमेपुत्रहोमेतथैवच॥२॥ व्रतोत्सर्गेमहा

दानेयत्ते चायतने शुभे ॥ जलयात्रां पुराकृत्वा श्रेष्ठकर्म समाचरेत् ॥ ३ ॥
अथातः संप्रवक्ष्यामि जलयात्राविधिं शुभं ॥ यत्तत्र लामति क्रम्य क्र
त्विग्भिर्गुरुणा सह ॥ ४ ॥ यजमानः सपत्नीकः सुहृद्बंधुजनैर्युतः ॥ अश्वा
रूढो गजारूढो वस्त्रालंकारभूषितः ॥ ५ ॥ गृहीत्वोपस्करं सर्वं गंधपुष्पा
क्षतादिकं ॥ जलाश्रयं ततो गच्छेत् गीतवादित्रनिस्वनैः ॥ ६ ॥ अनिर्दृंचवद्
दैंगच्छेन्नदीं वाथ समुद्रगां ॥ सुवासिन्योग्रतः कृत्वा सर्वालंकारभूषिताः
॥ ७ ॥ हैमराजतताम्रान्वा मृन्मयान्कलशान्शुभान् ॥ गृहीत्वा गंध
पुष्पाद्यैरर्चितान्सुदृढान्नवान् ॥ ८ ॥ जलाश्रयं समासाद्य तीरे गोमय
लेपिते ॥ चतुरस्रे कृते क्षेत्रे तत्र स्वस्तिकमालिखेत् ॥ ९ ॥ यवैर्वा तंदुलै
र्वापि पद्ममष्टदलं लिखेत् ॥ चत्वारः कलशान्स्थाप्याश्चतुर्दिक्षु वि

यस्तणेः ॥ १० ॥ तन्मध्ये च पुनः स्थाप्य कोणे कोणे समाहितः ॥ तत्र संपू
जयेद्देवं वरुणं यादसां पतिं ॥ ११ ॥ जलयात्रास्थकं संपूज्य जीवमात्रस्त
थैव च ॥ घृतेन वाथ दध्ना वा जले दद्यात्ततो बलिं ॥ १२ ॥ अभ्यः स्वाहेति
मंत्रेण द्वादशास्रुवकेण तु ॥ गृहीत्वा च ततः कुंभान्वारिपल्लवसंयुता
न् ॥ १३ ॥ सुवासिन्योग्रतः कृत्वा पूर्वं मंगलनिस्वनैः ॥ यागभूमिं स
मागच्छेत् मध्यमार्गे बलिं क्षिपेत् ॥ १४ ॥ यत्तमं उपमासाद्य स्थापये
द्वेदिकोपरि ॥ द्वारेण पश्चिमेनैव प्रवेशोनंतरेण तु ॥ १५ ॥ प्राङ्मुखो द
ङ्मुखो वापि यजमानो प्रवेशयेत् ॥ तस्याभिषेचनं कुर्यात्कलशस्थे
न वारिणा ॥ १६ ॥ मनसा चिंतये देवं प्रधानकर्म माचरेत् ॥ ततः नि
लिखानाहस्याग्दक्षिण्येन देवं जलाशयांतिकमानीय जलाधिवा

सनंकुर्यात्॥ तत्रप्रकारः। अथवापंचमृदः। पंचगव्यादिगृहीत्वातत्रवे
दिंकृत्वा॥ तदुपरिदेवंस्थापयित्वा। अष्टमृद्भिः शोधयित्वापंचगव्यैश्चशोध
येत्। आप्यायस्वेतिपयः। दधिक्राव्णइतिदधि। घृतंमिमिक्षइतिघृतं॥
गायत्र्यागोमूत्रं। पुरीष्यासगोमयं। ततः जलान्यापालिकंनीत्वातत्स्थानं
तोरणपुष्पमालाभिःशोभितंकुर्यात्॥ ततः पीठोपरिपद्मंकृत्वातत्स्थ
पद्मंजलाव्ययेस्थापयेत्॥ अथपीठस्याधोभागेओंआधारशक्तयेन
मः। इत्याधारशक्तिंपूजयित्वाप्रार्थयेत्॥ यदाधारेजगत्सर्वंसस्थावर
पंसंयुतं॥ लोकालोकसमाकीर्णंसंसारार्णवजलोद्भवं॥ सर्वबीजस
मापुर्णंप्राणाशक्तिसमन्वितं॥ सात्वंधत्स्वमहापीठंपत्रसंस्थाप्यतेह
इतिप्रार्थ्य। आधारशक्तयेनमइतिबलिंदद्यात्। ततःपीठस्यपरितः

प्रागादिदिक्षुअष्टदिग्गजान्। अक्षतान्गृहीत्वा॥ ओंऐरावतायनमः १
पुंडरीकायनमः २ वामनायनमः ३ कुमुदायनमः ४ अंजनायनमः ५ पुष्प
दंतायनमः ६ सार्वभौमायनमः ७ सुप्रतीकायनमः ८ प्रत्येकंसंपूज्य
बलीन्दद्यात्॥ तथैवपीठस्यपरितः अष्टदिक्षुअष्टौदिक्पालान्। त्राता
रमिंद्रमित्यादिनाआवाह्यसंपूज्यबलिंदद्यात्। ततः पीठोपरिअष्टमं
गलद्रव्याणिविकिरेत्॥ कस्तूरि १ कुंकुमकेशर २ गोरोचन ३ कर्पूर ४ चं
दन ५ नख ६ कंचोरा ७ गहुला ८ विन्यसेन्मध्यतस्तत्रविपुलंपीठिकाद्वयं॥
ततस्तत्रअग्रपीठिकायांवीरभद्रादिद्वारपालान्आवाह्यपूजयेत्। वी
रभद्रायनमः। नंदिनेनमः। महाकालायनमः। गणेशायनमः। वृषभा
यनमः। भृंगिणेनमः। स्कंदायनमः। उमायैनमः। चंडीश्वरायनमः॥ त

तःप्रथमं। ध्रुवाद्यौरितिपीठाभिमंत्रणं। अग्निर्विश्वेभिरितिमध्यमशिला
भिमंत्रणं। स्वैरदक्षैरित्युत्तरशिलाभिमंत्रणं। ततः स्थापयित्वासमभ्यर्च्य
लिंगंपिंडिकयासह। ततः शनकैःपिंडिकयासहलिंगंउध्धृत्यपीठिकायां
स्थापयेत्॥ प्राग्नालकमधःसूत्रंपिंडिकायाश्चास्यपश्चिमे। तत्रमंत्राः। अ
पांनपादिति। एवंअन्याअपिमूर्तयः। यथास्थानंस्थापयेत्। ततःयजमा
नः। आचम्यप्राणानायम्यदेशकालौसंकीर्त्य। एवंगुणेत्यादिपुण्यतिथौअ
स्यलिंगस्यकरिष्यमाणगर्भाधानादिसर्वसंस्कारेषुमध्येगर्भाधानपुंस
वनसीमंतोन्नयनानांक्षेत्रसंस्कारकत्वात्। अपांचसर्वबीजांकुरारंभक
त्वेनब्रह्मांडादिसर्वक्षेत्रभूतत्वात्अप्सुगर्भाधानादिसंस्कारत्रयंक
रिष्येइतिसंकल्प्यपुष्पाक्षतान्गृहीत्वाउदीर्षातइत्यप्सुप्रक्षिपेत्। पु

नःपुष्पाक्षतानादाय। भूषणोअर्भगसस्वराधइति। ओंअस्त्वग्नेसधिष्
व॰सजातोगर्भोअसिरोदस्योः। वृषात्वावृषणं। विष्णुर्योनिमितिसूक्तंज
पेत्॥ अथप्रार्थना। याआपोमातृभूताहिजगदुत्पत्तिपोषणेः॥ तत्कृतोग
र्भसंस्कारोलिंगेसमुपतिष्ठतामिति॥ गर्भाधानंक्षेत्रसंस्कारद्वारापुरुष
संस्कारमितिवचनात्। अथपुंसवनं॥ दूर्वाक्षतपुष्पानादाय। ओषधीः
प्रतिमोदध्वमित्योषधीप्रक्षेपः। हिरण्यगर्भःसमवर्त्तताग्रे॰। अद्भ्यःसं
भृतः॰॥ इतिपुष्पाक्षतदूर्वाणामप्सुप्रक्षेपः। यासांगर्भेहिसंजाताविरिं
च्याद्यामहाधियः॥ मह्यंपुंसवनाख्यस्मात्तस्मात्संसवनान्विताः। एते
नपुंसवनाख्येनकर्मणासंस्करोमि। इत्युक्त्वाअक्षतोदकंउत्सृजेत्॥
आपोहृयदिति। पुनःपुष्पाक्षतदूर्वानादाय। सीमंतोन्नयनानानसंस्का

रेणासंस्कारो मीस्कृत्का पुनः पुंसवनवत्॥ ओषधीः प्रतिमोदध्वं। हिरण्य
गर्भः समवर्त्तताग्रे॰। अद्भ्यः संभृतः। प्रजापतिं मनसा ध्यायेत्। अवदान
प्रसान्नाय भक्तं ब्राह्मणाय किंचिद्धान्यं जलमुत्सृजेत्॥ ततः औदुंबरस्त
बककुशतरुणैः त्रेण्याच अललया जले त्रिः रेखाकुर्यात्। ओं भूर्भुवः
स्वः। अथ त्रिरालो उयति जले सोमो राजा नो वतु मानुषीः प्रजा नि विष्ट
वक्रासाविति सूत्रोक्तमंत्रः। ब्राह्मणभोजनसंकल्पः। अस्मिन् कर्मणि
ब्राह्मणान् भोजयिष्ये। अथ प्रार्थना॥ विष्णोस्त्वया बीजवहा वहाख्या
सीमंतिनी गर्भभरणयुक्त॥ सोयं भवत्वो विदधातु कामान् सीमंत
संस्कारितनीरकेऽग्र॥१॥ अस्मिन् सदाशिवक्षेत्रे न्नीलाभूते विधान
तः॥ कृतः सीमंतसंस्कारस्तेन तुष्यतु मे हरः। ततः जलप्रार्थना। अ

सुमे सोमो अभक्॥ समुद्रज्येष्ठाः सलिलस्य मध्यं॥(४)॥ सर्वेषामेव बीजानां
कारणानि जलानि तु॥ जीवनं सर्वजंतूनां तेषु संस्थास्य तेहरः। इस्त
कासपीठं सशिलं पिंडिकया सह देवं जले स्थापयेत्॥ इस्तपमन्युप्रोक्तो
जलाधिवासनविधिः॥ ॥ अथ जलयात्राप्रयोगः॥ आचम्य प्राणाना
यम्य। अद्येत्यादिकालज्ञानं कृत्वा शिवप्रतिष्ठांगभूतं जलयात्रां करिष्ये
इति संकल्प्य। ब्राह्मणोनुज्ञातः पूजोपस्कारेण निकलशांश्च गृहीत्वा
सुवासिनीः कृत्वाचार्य ऋत्विग्भिः सह गीतवादित्रशांतिपाठयुक्तोय
जमानो जलाशयं गच्छेत्॥ ततो जलाशयसमीपप्रदेशे प्रक्षाल्य गोम
येन चतुरस्त्रमुल्लिख्य यवैस्तंदुलैर्वा चारुस्वस्तिकपद्माष्टदलं वा चतुरस्रं
मंडले कृत्वा। वलिया पर्वतानामिति भूमिं ध्यात्वा मंडलस्याष्टदिक्षु तं

८

दुलपुंजान् कृत्वा तासु कलशान् स्थापयेत्॥ ततः पुनंतु मामिति सप्तभि
र्दर्भपिंजूलैः कलशमापविज्ञीकरणं गंधद्वारामिति कुंकुमगंधादीनां ले
पनानां पुनंतु मेति षड्भिस्तवनं स्थिरीकरणं कलशमूले ब्रह्माणं मध्ये वि
ष्णुं कंठे रुद्रं चावाहयेत्॥ इमंमेगंगेयमुने स्फदक पूर्णया ओषधीरिति स
र्वौषधीः प्रक्षेपः। हिरण्यगर्भेति हिरण्यं। युवासुवासा इति वस्त्रेण वेष्ट
नं। वनस्पतेशतवल्श इति पंचपल्लवाः। कांडात्कांडा दिति दूर्वाः। याऔ
षधीः प्रतिमोदध्वमिति पुष्पमालाः। ध्रुवाद्यौरिति धूपं। श्रियेजात इति
दीपं। अन्नपत इति नैवेद्यं॥ धूषमिव कलशे सोमम् इति नमस्कारः। ततो
घटेषु गंगाद्यावाहनं। प्रपद्ये वरुणं देवं अंभसां पतिमीश्वरं। याचितं देहि
मे तीर्थं सर्वपापापनुत्तये॥ त्वपनस्पृशुते देवी त्रिषु लोकेषु विश्रुते। यज

८

मानाभिषेकार्थं महापातकनाशनं॥ सरस्वती नमस्कृत्य महेश्वर हरिप्रिये॥ य
जमानाभिषेकार्थं महापातकनाशयेत्॥ इमंमेगंगे। त्वंदेवि सरस्वति। पाव
कानः सरस्वती। सितासिते सरिते। अश्वावती गोमतीः। याः प्रवत इति प्रति
ष्ठागंधादिभिः पूजनं। अथ स्थापित घटसमीपे वरुणपूजा॥ एह्येहि यादो

न

गणवारिधीनां गणेश दैवेनृगसहाप्सरोभिः॥ विद्यामहं त्वामरगीयमानाप
हि त्वमस्मान् भगवन्नमस्ते॥ तीक्ष्णायुधं तीक्ष्णगतिं दिगीशं चराचरेशं व
रुणं महांतं॥ प्रचंडपाशांकुशवज्रहस्तं भजामि देवं कुलवृद्धिहेतोः॥२९॥
इति ध्यात्वा वरुणमंत्रैः पूजनं कर्त्तव्यं॥ ततो जलमातृकापूजनं। कलशा
दाग्नेय्यां स्वस्तिकादौ अक्षत सप्ताक्षतपुंजेषु मातृका स्थापनं। तासां नामानि॥
मत्सी कूर्मी च वाराही दर्दुरी मकरी तथा॥ भल्लकी तंतुकी चैव सप्तैता ज

४

लमातृकाः ॥२२॥ मत्स्यैनमः मत्सीं आवाहयामि। कूर्म्यैनमः कूर्मीं आवा० २
वाराह्यैनमः वाराहीं आवा० ॥३॥ दर्दुर्यैनमः। दर्दुरीं आवा० ४ ॥ मकर्यैनमः म
करीं आवा० ५ ॥ भल्लक्यैनमः। भल्लकीं आवा० ६॥ तंतुक्यैनमः। तंतुकीं आवा० ७
प्रतिष्ठापूर्वकं पूजनं कुर्यात्॥ ॥ अथजीवमातृकास्थापनं तत्रैव॥ तद्यथा
तत्पुरतः सप्ताक्षतपुंजाः कार्याः। तास्त्वाह॥ कुमारीधनदानंदाविमलामंग
लाबला॥ पद्मावेतिचविख्याताः सप्तैताजीवमातृकाः ॥१॥ कुमार्यैनमः
कुमारीं आवा० १ धनदायैनमः। धनदां आवा० २ नंदायैनमः नंदां आवा० ॥३
विमलायैनमः। विमलां आवा० ४। मंगलायैनमः। मंगलां आवा० ५ बला
यैनमः बलां आवा० ६॥ पद्मायैनमः पद्मां आवा० ७॥ गंधादिभिः पूजनं॥
तदग्रतः पुनः सप्ताक्षतपुंजेषु स्थलमातृकापूजनं॥ तामान्याह॥ कूर्मी

४

लक्ष्मी महामायापानदेवी तथैवच॥ वारुणीनिर्मलागोधाः सप्तैता
स्थलमातृकाः ॥१॥ कूर्म्यैनमः कूर्मीं आवा० १ लक्ष्म्यैनमः। लक्ष्मीं आ
वा० २॥ महामायायैनमः। महामायां आवा० ३ पानदेव्यैनमः। पानदे
वीं आवा० ४ वारुण्यैनमः वारुणीं आवा० ५ निर्मलायैनमः निर्मलां आ
वा० ६ गोधायैनमः गोधां आवा० ७॥ गंधादिभिः पूजनं॥ ततोमंडल
बहिरष्टदिक्षु दिक्पालाननिलत्तन्मंत्रमावाह्यपूजयेत्॥ समंततोदीपा
न्प्रज्वाल्यमंत्रेणविसृज्य स्थापितदेवतानां जले प्रक्षेपः। ततः अग्न्यः
स्वाहेत्यादिमंत्रेण द्वादशाघृताहुतीर्जले दद्यात्॥ स्रुवेणाघृतंगृहीत्वा।
ओं अद्भ्यः स्वाहा। अद्भ्य इदंनमम। वहंतीभ्यः स्वाहा। वहंतीभ्य इदं॥
परिवहंतीभ्यः स्वाहा परिवहंतीभ्य इदं॥ समंतंवहंतीभ्यः स्वाहा० स

मंतंवहंतीभ्य इदं०॥ शीघ्रंवहंतीभ्यः स्वाहा। शीघ्रंवहंतीभ्य इदं० शीभं
वहंतीभ्यः स्वाहा। शीभंवहंतीभ्य०। उग्रंवहंतीभ्यः स्वाहा। उग्रंवहंती
भ्य०। भीमंवहंतीभ्यः स्वाहा। भीमंवहंतीभ्य०। अंभोभ्यस्वाहा। अंभो
भ्य० नभोभ्यस्वाहा। नभोभ्य०। महोभ्यस्वाहा। महोभ्य इदं०। सर्वस्मै
स्वाहा। सर्वस्मै इदं न मम॥ इति द्वादशाहुतयः॥ ततो वरुणप्रार्थना॥
प्रतीचीनाथ नमस्तुभ्यं सर्वबाधाविनिषूदन॥ पवित्रं कुरु मे देव सर्वकार्ये
षु सर्वदा॥ ज्ञानताज्ञानतो वापि भगवंनच्युतं मया॥ तत्सर्वं पूर्णतो वा
स्तु त्वत्प्रसादाज्जलाधिप॥ ज्ञानतोऽज्ञानतो वापि यावान्विधिरनुष्ठि
तः॥ तत्सर्वं त्वत्प्रसादेन संपूर्णं भवतु प्रभो॥ ॥ इति वरुणं संप्रार्थ्य॥
उत्तिष्ठ ब्रह्मणस्पत इति कलशानुत्थाप्य॥ सुवासिनीनां हस्ते दत्वा

यथेमावाचं कल्याणि॥ शाकुनादिसूक्तं पठेत् गीतवाद्यादियुक्तो यजमं
उपमार्गं गच्छेत्॥ इति जलयात्राविधिः॥ अथ देवप्रबोधनं॥ ॥ तद्यथा॥
ओं नमो भगवते सदाशिवाय सकलतत्वात्मिकाय सकलतत्वविदूराय
सकललोकैककर्त्रे सकललोकैकहर्त्रे। सकललोकैकगुरवे। सक
ललोकैकसाक्षिणे सकलनिगमगुह्याय सकललोकैकशंकराय
शशांकशेखराय शाश्वतनिजावासाय निराभासाय निरूपम
निराधाराय ऽनिःप्रपंचाय निर्लेपाय निर्द्वंद्वाय निरुपमविभवाय
नित्यशुद्धपरिपूर्णसच्चिदानंदाद्वयाय परमशांतप्रकाशतेजोमया
य ओं जय जय महारुद्र रौद्र भद्रावतार महाभैरव कल्पांतभैरव
कालभैरव कपालमालाधर खट्वांगखड्गचर्मपाशांकुशधर डमरु

१२

शूलचापबाणगदाशक्तिभिंडिपालतोमरमुसलमुद्गरभुशुंडीप्रा
सपरिघशालघ्नीजालचंद्रार्धचंद्रायुधभीतभीषणाकरसहस्रमुखदंष्ट्रा
करालविकटाट्टहासविस्फुरितब्रह्मांडमंडलनागेंद्रकुंडलनागेंद्रहारव
लयनागेंद्रचर्मधरमृत्युंजयत्र्यंबकत्रिपुरांतकविश्वेश्वरविरूपाक्षवृष
भवाहनविषविभूषणविश्वतोमुखसर्वतोमुखरक्षमांरक्षमांनमस्ते
नमस्ते॥ ॥इतिस्तुत्वा॥ जलाद्बहिः देवेआनीयमाने। उतत्वांतुज
नवः। इत्युद्बोधमंत्रः। प्रबुध्यावईरते। ऋक्॥ उद्बुध्यस्वाग्ने०।१।बो
धामेअस्य।१। अबोध्यग्निः समिधा० दधामीसेतदं[illegible]तं। धामंतेवि
श्वंभुवनं०१। समुद्रोसि। यदाकूतात्।१ अभ्यः स्वाहेति।२। विष्णोर्नु
कं। वीर्याणि।५। भवामित्रोनसेव्योघृतासुतिः ०५। परोमात्रयान

१२

न्वासूक्तं। अस्यवामस्यपलितस्यहोतुः ५२॥ सूक्तं। कद्रुद्रायप्रचेतसेसू
क्तं। इमारुद्रायतवसेकपर्दिने। सूक्तं। आतेपितर्मरुतांसुम्नमेतु। सूक्तं।१५
इमारुद्रायस्थिरधन्वनेगिरः।४॥ सूक्तं। आवोराजानमध्वरस्यरुद्रंसू
क्तं।१। तवश्रियेमरुतोमर्जयंत।१। तमुष्टुयः स्विषुः।१। त्र्यंबकंयजामहे।२।
इत्यादिवेदसूक्तैःस्तुत्वासंसृष्टेदेवतदेवाग्निरित्यादि। अग्निस्लिंगमन्त्रेणावि
षा०चक्षुषःपितामनसाहिधीरः ८ इत्यादिसूक्तैर्यस्ययावान्स्वरोभवे
त्तावतासवनेनोच्चैः पठेत्। ततः गंगातीरस्यस्तिकमालिख्य। तत्र
देवंस्थापयित्वा। देवंजलाज्जातमितिभावयित्वा। यजमानः आच
म्यप्राणानायम्यदेवस्यलिंगस्यजातकर्माख्यंकर्मकरिष्ये। तत्रा
यंक्रमः। यथापातः पुष्करिणीमिति। कुशोदकेनदेवस्यगुप्तस्त्रिस्थ

१३

नंप्रोक्षेत्। अपज्योतिषातमइत्यनेनमंत्रेणगोवालमलादिक्षालनंकु
र्यात्। ततोमधुघृतेनवादेवस्यमुखेदद्यात्। प्रतेददामि० सोत्रः अथदे
वस्यनाभिमालभ्यायुष्यंकरोति। अग्निरायुष्मानितित्रिः ३ कस्यपस्य
त्र्यायुषं। अथास्यलिंगस्यदीर्घकालमभिवृध्यर्थंवात्सप्रोपस्थानंकु
र्यात्। दिवस्परि० विवत्रुः। इममनुप्राणितेतिपूर्वंब्रूयात्। अथजात
देशाभिमंत्रणं। अस्माभवपरशुर्भव॥ सोत्रः। अथापोपिमंत्रयते। इ
डासीति। विष्णिघापुरमितियत्लेमनइति। दक्षिणोत्तरजलेनदेवमभ्य
भ्युक्षेत्॥ ॥ इतिजातकर्मविधिंसंपाद्य॥ ततः प्रभूतघृतमादायसर्वां
गेषुदेवमुद्वर्तयेत्। पुनस्त्वादित्याइत्यादि॥ ततः संपादितमंगलद्रव्यैः दे
वंउद्वर्त्यस्नापयेत्। आपोअस्मानितिवस्त्रेणजलंपरिमार्ज्यतद्वस्त्रंत्रि

१३

लिप्तेनेदद्यात्॥ ततः पंचोपचारैः संपूज्यचंदनेनानुवर्त्यपुष्पमालाभि
रलंकृत्यपंचनीराजनंदीपैनीराज्यश्रियेजातइतिऋक्॥ १॥ ततः बहि
र्जलेनचभूतेभ्योबलिंविकिरेत्। गृह्णंतुपार्षदाः सर्वेशिवस्यानुचराः स
दा॥ मातरः प्रमथाघाश्च बलिमोदनमुत्तमं॥ स्कंदस्यानुचरायेचयेच
चंडीपरिग्रहाः॥ तेगृह्णंतुमयादत्तंबलिमोदनमुत्तमं॥ इतिबलिंदद्या
त्॥ पुनः देवंनमस्कृत्यप्रार्थयेत्। तद्यथा॥ हिरण्मयांडंप्रबभूवयस्मा
त्सएकआसीद्भुवनाधिपत्ये॥ भूमिंतथाद्यांविदधातरस्मैदेवायकस्मै
हविषाविधेम॥ १॥ हिरण्यगर्भः समवर्त्तताग्रे॥ ० यआत्मदः स्रोर्यदे
वलोकेयत्कर्मदेवाः समुपासयंति॥ मृत्युर्जंतुस्यायतएवतस्मैदेवाय
कस्मैहविषा०॥ २॥ यआत्मदाबलदाः॥ यः प्राणतः पालनतोमहा

१५

योराजा बभूवंनिजगस्सतिर्यः॥ चतुष्पदश्चद्विपदाश्चतस्मैदेवायकस्मै
हविषा०३॥ यः प्राणतोनिमिषतो० इमंहिमांतो: किरणा महांतंयस्यां
बुधिंवेदमनिघयोतुः॥ दिशः करायस्यपरापलस्मैदेवायकस्मै०४॥य
स्यमेहिमवंतः० योरोदसीसर्वहृदेचकारस्वस्तंभितंयेनजगत्रयंच॥
यश्चांतरिक्षेविराजतस्मैदेवाय०॥५॥ येनद्यौरुग्रा॥० यंक्रंदसीविस्त
भितेमहांतंविलोकयामासदुरीत्रावस्यो॥ यज्ञोरविर्भातिहिवाय त
स्मैदेवाय०॥६॥ यंक्रंदसीअवसातस्तभाने० आपोमहद्योयतएव
विश्वंगर्भंदधानाश्चहुताग्नंयाः॥ प्राणाःसुराणांततएवतस्मैदे
वाय०॥७॥ आपोहयद्बृहती:० यस्यायएकस्यमहतरूपंदक्षक्रतुंलो
किलुमीर्यमाणाः॥ देवेषुचैकःप्रबभूवतस्मैदेवाय०८॥ यश्चिदापो

१४

महिना०॥ नोमांप्रहिंस्याज्जनितापृथिव्यो यःसत्यधर्माप्रजजानलोकं॥
आपोबृहत्योयतएवतस्मैदेवायकस्मैहविषाविधेम॥९॥ मानोहिंसी
ज्जनिताय: पृथिव्याः०॥ ततःवाद्यघोषेजायमानेतोरणपुष्पमालालंकृते
रथेदेवंकूर्मशिलाआधारशिलासहितमारोप्यरथेतिष्ठन्तिपठेत्सूक्ति
स्तः॥ अन्यानिचतदंगानिहरीनहरभूदेवीशेषवृषभादिरूपाणियथा
लाभंरथमारोप्य॥ सौवर्णघृन्यतमंभाजनंबिभ्रत्यापूर्वैक्रियासुवासि
न्यागृहीतचूतपल्लवादिपुष्पकुलग्नहस्ताभिःसुवासिनीभिःशुभे
भिःस्त्रीसमाजंपुरतःकृत्वावाद्यपुरःसरंअधिवासनस्थानात्प्रासाद
प्राग्दक्षिणपनदेवंमहामंडपमानीयमध्यमार्गेक्षेत्रपालायबलिंदद्या
त्॥ ओंनमोभगवतेक्षेत्रपालनभासुरत्रिनेत्रज्वालामुखअवलरअ

१५

वलरपिंगणउर्ध्वकेशजिव्हालाल छिंधिछिंधि भिंधिभिंधि कुरुकुरु मुरुमुरु
चलचल लंघः ह्रां ह्रीं हुं हूः बलिं गृह्णाण स्वाहा। बंधुज्ञातिसमन्वितो ब्राह्म
णसमन्वितो ब्राह्मणमंत्रघोषेण दुंदुभिः शब्देश्च देवयजनं प्रसागच्छेत्॥
मंडपद्वारसमीपे समाचारात्॥ यजमानस्योत्तर बलिं कुर्यात्॥ ततः आ
चार्यैक्षित कृताचारश्चेतन्मध्ये स्थापितपारिभद्रासने दूर्वाविस्तोत्तरपदेशा
सुखं यजमानं पत्नीपुत्रसुहृद्वर्गयुतमुपवेश्य यागस्वपसस्सुखं ऋत्विज्सुखः।
कलशान्गृहीत्वा किंचित्किंचिदुदकं पात्रे समादाय ससधान्यांकुर दूर्वाकुश
पुष्पपंचपल्लवैस्तिष्ठन्नभिषिंचयेत्॥ ॐ चाभिषेकमध्ये हीमं मंग
लं स्वस्तिवाचनं प्रैषं च मंत्रपाठं च तिष्ठन् कुर्यात् सद्देवहि। देवस्यत्वेतित
सृभिः शिरोमेति चतसृभिर्यद्देवा देवहेडनमिसनुवाकेन पुनंतुमेत्ति नव

१५

भिः पावमानेन सूक्तेन समुद्रज्येष्ठा इति चतसृभिः सुरास्त्वामभिषिंचंत्वि
त्यादिनां स्मार्त्ताभिषिंचनं तदनंतरं कलशाच्छेदकेन चोदकार्थं सर्वेपिक
यें॥ ॥इति जलयात्रा॥ ॥ततः देवं आसनेनिधाय। ऋत्विजः तत्परि
वारकांश्च वस्त्रालंकारणादिभिः॥ सं पूज्यतान् क्षमध्वमिति ब्रूयात्। इति
देवप्रबोधनं॥ ॥अथ मंडपपूजा॥ ॥तत्रायं क्रमः। यजमानः सपत्नीकः
पुत्रादियुतः आचार्यऋत्विक्सहितः संपूर्णकलशहस्तो तूर्यध्वनौ जाय
मानेभद्रं कर्णेभिरिति वेदघोषेण मंडपं प्रदक्षिणीकृत्य सकुनसूक्तं पठेत्।
सुवासिनी मग्रतः कृत्वा मंडप पश्चिमद्वारे पास्थित्वा। चतुर्भुजां सुक्लां कूर्म
पृष्ठोपरिस्थितां पद्मशंख चक्रवरहस्तां आगच्छ सर्वकर्माणि वसुधे लोक
धारिणी॥ पृथिवी ब्रह्मदत्तासि काश्यपेनाभिवंदितेति भूमिं संप्रार्थ्य पु

१६

ष्यांजलिंसफलंदत्वा। उधृतासिवराहेणकृष्णेनशतबाहुना॥ दंष्ट्राग्रेलीलि
यादेवीयज्ञायप्रणमाम्यहं॥ ब्रह्मणानिर्मितेदेवीविष्णुनारुद्रंकरेणच॥ पा
र्वत्याचैवगायत्र्यास्कंदवैश्रवणेनच॥ यमेनपूजितेदेविधर्मस्यविजिगीषया।
सौभाग्यंदेहिपुत्रांश्च धनंरूपंचपूजिता॥ गृहाणार्घ्यमिमंदेविसौभाग्यंच
प्रयछमे। इत्यर्घ्यंदत्वा॥ जानुभ्यांधरणींगत्वातद्वारेणैवमंडपंप्रविशेत्।
द्वारेणपश्चिमेनैवप्रविशेद्दक्षिणेनतु॥ होमद्रव्यंचपूर्वेणदानार्थंदक्षिणे
नतु॥ प्रतिष्ठार्थांश्चसंभारानुत्तरेणप्रवेशयेत्॥ मंडपांतः पश्चिमतउप
विश्यपंचगव्यंकुर्यात्ः शुचीवोहव्येति-आपोहिष्ठेतिमंडपभूमिंप्रोक्ष्याचम्य
प्राणानायम्य-अद्येत्यादिकरिष्यमाणशिवप्रतिष्ठांगत्वेनमंडपदेवतास्था
पनादिकरिष्येइतिसंकल्प्य। ईशानाभिमुखस्थित्वासिद्धार्थान्सर्वतोवि

१६

किरेत्॥ अपवित्रःपवित्रोवा०-अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं॥
सर्वेषामविरोधेनब्रह्मकर्मसमारभेत्॥ अपसर्पंतुयेभूतायेभूताभूमि
संस्थिताः॥ येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया॥ यदत्रसंस्थितंभूतं
स्थानमाश्रित्यसर्वदा॥ स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु॥ भूतानि
राक्षसावापियत्रतिष्ठंतिकेचन॥ तेसर्वेप्यपगच्छंतुदेवयागंकरोम्यहमिति।
मंत्रैः॥ ततःकृतांजलिःस्वस्त्ययनंतार्क्ष्यमितिमंत्रद्वयंपठेत्॥ ततःपूर्वदि
शिमंडपद्वाराद्बहिःहस्तमात्रेअश्वत्थंसुवर्णप्रफमाल्यवाद्यैरिसहितंत्रि
शूलांकितं। सुशोभनसंज्ञकंतोरणं॥ एह्येहिसुशोभनतोरणएतंयज्ञंर
क्षसर्वविघ्नान्निवारय॥ अग्निमीळइत्यावाह्यवज्रसंधातपूर्वद्वारंकृता
लयऋग्वेदाधिपतेनाम्नासुशोभननमोस्तुते। इत्यावाह्यऋग्वेदाधिष्ठि

१७

तायसुशोभनंतोरणायनमइतिगंधपुष्पमालांवस्त्रादीन्यस्यप्रपूज्य। तोरणो
परित्रिशूलंन्यस्यत्रिशूलायनमइतिप्रपूज्य। राहुबृहस्पतितत्रन्यसेत्॥ राहुबृ
हस्पतिभ्यांनमइतिपूजयेच्च। ततोमहीद्यौरितिभूमिंस्पृष्ट्वान्प्रार्थ्यओषधयः
समितियवान्सप्तधान्यानिक्षिप्त्वा॥ ध्रुवासिबकुलमित्येवंकलशंपुंजोप
रिनिधाय। इमंमेगंगेइतितीर्थाद्भिरापूर्यगंधद्वारामितिगंधांक्षिप्त्वायाओष
धीरितिसर्वौषधीः ओषधयः समितियवान्कांडात्कांडादितिदूर्वाः अश्व
त्थेवइतिपंचपल्लवान्॥ स्योनापृथिवीतिपंचमृदः॥ याः फलिनीरितिफलं।
सहिरत्नानीतिपंचरत्नानि। हिरण्यरूपइतिहिरण्यंयुवासुवासाइतिवस्त्रं।
रक्तसूत्रेणच्चमुखेवेष्टयेत्। पूर्णादर्वीतिपरिधान्यपूर्णपात्रंनिधापत
त्रध्रुवमावाह्यपूजयेत्॥ ततोदक्षिणेओदुंबरंभिन्नांजनप्रभंविंध्यसहि
तंत्रिशूलांकितं॥ सुभद्राख्यंतोरणं। एह्येहिसुभद्रतोरणएतंपततरक्षसर्ववि

१७

घ्नांनिवारय ॐइषेत्वोर्जेत्वानमस्तेधर्मराजायदक्षिणाद्वाराधिपायच॥ य
जुर्वेदायदेवायसुभद्रान्नामतोरणं॥ इतिचावाह्ययजुर्वेदाधिष्ठितायसु
भद्रतोरणायनमइतिगंधादिनाप्रपूज्यतोरणोपरित्रिशूलं। न्यस्यत्रिशू
लायनमइतिप्रपूजयेत्॥ तत्रसूर्यसोमौन्यस्यसूर्यसोमाभ्यांनमइतिपूज
येत्। ततः पूर्ववत्कलशंस्थापयित्वातत्रधरामावाह्यपूजयेत्॥ ततःपश्चि
मप्लक्षंसिंदूरप्रभंगंधमादनेनसहितंत्रिशूलांकितं। सुभीमाख्यंतोरणं।
एह्येहिसुभीमतोरणएतंपततरक्षसर्वविघ्नान्निवारय। ओंअग्नआयाहि
ति। नमस्तेकामरूपायपश्चिमद्वारपायच॥ सामवेदाधिपस्त्वंहिनाम्ना
कल्याणकारकः॥ इतिआवाह्यसामवेदाधिष्ठितायसुभीमतोरणाय
नमइतिगंधादिनाप्रपूज्यतोरणोपरित्रिशूलंन्यस्यात्रिशूलायनमइति

१८

प्रपूजयेत्। तत्र शुक्रबुधौ न्यस्य शुक्रबुधाभ्यां नम इति पूजयेत्। पूर्ववत्क
लशं निधाय तत्र वा कूपतिमावाह्य पूजयेत्। ततः उत्तरे न्यग्रोधं स्फटिकप्रभं
हिमवत्सहितं त्रिशूलांकितं सुप्रभाख्यं तोरणं। एह्येहि सुप्रभतोरण एतं यज्ञं
रक्ष सर्वविघ्नान्निवार्य सौम्यान्नो देवीरभिष्टय इति नमस्ते दिव्यरूपाय अ
थर्वाधिपते प्रभो।। कलेरधिपतिर्नाम्ना मंगलस्योत्तरायच। इत्यावाह्य अ
थर्ववेदाधिष्ठिताय सुप्रभतोरणाय नम इति गंधादिना प्रपूज्य तोरणोप
रि त्रिशूलं न्यस्य त्रिशूलाय नम इति पूजयेत्।। तत्र सोमकेतुग्रहानीन्य
स्य सोमकेतुग्रहानिभ्यो नम इति पूजयेत्। पूर्ववत्कलशं निधाय तत्र विघ्ने
ग्रामावाह्य गंधादिना पूजयेत्।। ।। इति तोरणपूजनं। ततः पूर्वद्वारे ग्रा
खाद्द्यपे कलशाढ्यं चंदनोदकफलसप्तमृत्तिकापंचपल्लवसर्वौषधीसुवर्ण
पंचरत्नादियुतं दध्यक्षतविभूषितं वस्त्रपुष्पमालाचंदनचर्चितं कल

१९

शं स्नानं तं पूर्ववन्मंत्रैः स्थापयेत्। प्रतिकलशं मंत्रावृत्तिः। ऐरावतं कलशद्वये न्यस्य
पूजयेच्च। ऐरावताय नम इति पूजनं। कलशेपरि घृतेन तैलेन वा दीपो देयः। त
त्र ऋग्वेदिनौ ऋत्विजौ पूर्वद्वारे शांतिसूक्तं जपार्थं त्वेन त्वामहं वृणे वृतोस्मीति प्र
तिवचनं। ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः। अत्रिगोत्रिस्त्रिविप्रेंद्र ऋत्वि
क्त्वं मे मखे भव। इति प्रसेकं कृत्वा। अग्निमीळे पुरोहितमिति गंधादिना पूजयेत्।
ततः सहस्राक्षमैरावतस्थं पीतं किरीटकुंडलधरं दक्षिणवामकरस्थवज्रोत्प
लमिंद्रं ध्यात्वा।। एह्येहि सर्वामरसिद्धसाध्यैरभिष्टुतो वज्रधरामरेश। संवीज्य
मानोप्सरसां गणेश्च रक्षाध्वरं नो भगवन्नमस्ते। भो इंद्र इहागच्छेह तिष्ठ। सांगं
सपरिवारं सायुधं सशक्तिकं द्वारकलशयोरावाहयामि इंद्रमिति संपूज्य। आ
शुःशिशानः इति पीतां पताकां पीतध्वजं च इंद्रप्रीतये पंचहस्तदंडे उच्छ्रयेत्। द्वारशा
खयोः भूर्लोकाय नमः। भुवर्लोकाय नमः स्वर्लोकाय नमः। दक्षिणे ध्रुवाय नमः।

१९

वामे सोमाय नमः॥ द्वारश्रियै नमः। ऊर्ध्वदेहल्यां अधः वास्तुपुरुषाय नमः। वामे दक्षिणस्तंभयोः गणेशाय नमः।० ब्राह्म्यै० माहेश्वर्यै० विघ्नध्न्यै नमः। मायान्वितायै न० धात्रे० विधात्रे० शंखनिधये० पद्मनिधये नमः। कलशाद्ये ॐ गंगायै न० यमुनायै० असितांगभैरवाय नमः। इंद्रः सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः। शतयज्ञाधिपो देवस्तस्मै नित्यं नमो नमः। इति नत्वा। इंद्राय सांगाय सपरिवाराय सायुधाय सशक्तिकाय एतं सदीपमाषभक्तबलिं समर्पयामि। इंद्राय बलिं दत्वा। आचमेत्। ततः आग्नेय्यां गत्वा पूर्ववत्कलशं संस्थापयित्वा तत्र पुंडरीकं अमृतं च रूरूपौ एवं च पूजयित्वा। दीपो देयः। छागस्थं रक्तं दक्षिणवामकरद्वयधृतशक्तिकमंडलुं यज्ञोपवीतिनं अग्निं ध्यात्वा। एह्येहि सर्वामर हव्यवाह मुनिप्रवर्यैरभितोभिजुष्ट। तेजोवता लोकगणेन सार्द्धं ममाध्वरं पाहि कवे नमस्ते। भो अग्ने इहागच्छ इह तिष्ठ सांगं सपरिवारं सायुधं सशक्तिकं कलशे आवाहयामि अग्न इति अग्निं गंधादिना प्रपूज्य। अग्निं दूतमिति रक्तपताकाध्वजावुच्छ्रयेत्॥ आग्नेयः पुरु

१९

षो रक्तः सर्वदेवमयोव्ययः॥ धूमकेतुरनाध्यक्षस्तस्मै नित्यं नमो नमः। अग्नये सांगायेत्यादि॥ माषभक्तबलिं समर्पयामि। आचम्य। ततः दक्षिणे गत्वा शस्त्रद्वये पूर्ववत्कलशद्वयं निधाय। वामननामकं दिग्गजं न्यस्य वामनाय नम इति पूजा। दीपो देयः। ततो यजुर्वेदिना द्विजेन दक्षिणद्वारे शांतिसूक्तजपार्थं त्वेन त्वा महं वृणो। वृतोस्मीति। कात्यायनोक्तयजुर्वेदरक्षणार्थं विष्णुदेवतः। काश्यपेयः कविर्विप्रं ऋत्विक् त्वं मे मखे भवेति प्रसेकं कृत्वा। इषे त्वोर्जे त्वेति गंधादिना प्रपूज्य। ततः महिषारूढं धृतदंडपाशं दक्षिणवामकरद्वयं कृष्णाजिनं निसोपम अग्निसमलोचनं यमं ध्यात्वा एह्येहि वैवस्वत धर्मराज सर्वामरैरर्चित धर्ममूर्ते॥ शुभाशुभानंदशुचामधीश शिवाय नः पाहि मखं नमस्ते। भो यम इहागच्छ इह तिष्ठ सांगादि० यमं कलशे आवाहयामि। यमाय सोमं सुनुतेति मंत्रेण यमपूजा। कृष्णां पताकां कृष्णध्वजं च आयंगौरिति मंत्रेण उच्छ्रयेत्। ॐ द्वारश्रियै नमः। ऊर्ध्वदेहल्यां

२०

अथः वास्तुपुरुषाय० स्तंभयोः पुष्पदंतायनम० कपर्दिने० कौमार्यै० वैष्णव्यै०
विघ्नकर्त्रे नमः। मायाशक्त्यै० धात्रेनमः। विधात्रेनमः। शंखनिधयेनमः। गोदा
वर्यै०। कूष्मांडायै० चंडभैरवाय० महामहिषमारूढं दंडहस्तं महाबलं॥ आवाह
याम्यहंत्वस्मिन् पूजेयं प्रतिगृह्यतां॥ नत्वा। यमायसांगायेत्यादि माषभक्तब
लिं० ततः आचम्य। नैर्ऋत्यांगत्वा पूर्ववत्कलशंनिधाय। कुमुदं दुर्जयं क्रोधभै
रवंचसंपूज्य। दीपोदेयः। ततः नरारूढं महाकायं खड्गहस्तं महाबलं। नीलं
बहुराक्षसवेष्टितंपीताभरणभूषितं नैर्ऋतिंध्यात्वा। एह्येहि रक्षोगणनाय
कस्त्वं विरूपाक्ष वेतालपिशाचसंघैः। ममाध्वरंपाहि पिशाचनाथलोकेश्व
रस्त्वं भगवन्नमस्ते॥ भोनिर्ऋते इहागच्छेहतिष्ठसांगायेत्यादि० कलशेआवा
ह्य। असुन्वंतमितिनिर्ऋतिंपूजयेत्। नीलांपताकांनीलध्वजंचमोषुणइ
त्युच्छ्रयेत्। निर्ऋतिंखड्गहस्तंचसर्वलोकैकपावनं। आवाहयाम्यहंत्वस्मि

२०

न्पूजेयंप्रतिगृह्यतां। नत्वासांगायेत्यादि० निर्ऋतये एतं माषभक्तबलिं० ततः
आचम्य पश्चिमेगत्वातत्रशाखाद्वयेकलशद्वयंनिधाय अंजनाख्यंदिग्गजंत
त्रन्यस्य अंजनायनमइति पूजयेत्। दीपोदेयः। ततः सामवेदाद्द्विजोपश्चि
मद्वारे शांतिसूक्तजपार्थत्वेनत्वामहंवृणे। वृतोस्मीति। सामवेदस्य पिंगा
क्षोजागतः शक्रदेवता। भारद्वाजसूक्तविनियोगः ऋत्विक्त्वंमेमखेभव इतिप्रत्येकं
वृत्वा। अग्नआयाहीतिगंधाद्युपचारैः पूजयेत्। ततोमकरस्थंपाशहस्तं
शुक्लवर्णंकिरीटधारिणं वरुणंध्यात्वा एह्येहियादोगणवारिधीनांगणेनप
र्जन्यसहाप्सरोभिः॥ विद्याधरेंद्रामरगीयमानापाहित्वमस्मान्भगवन्न
मस्ते। भोवरुणइहागच्छेहतिष्ठसांगायेत्यादि० वरुणंकलशयोरावाह्य। तत्त्वा
यामीतिवरुणंपूजयेत्। श्वेतांपताकांश्वेतध्वजंरंमंवरुणेसमुच्छ्रयेत्। ओं
द्वारश्रियैनमः। ऊर्ध्वदेहल्यां अथः वास्तुपुरुषायनमः। स्तंभयोः नंदिने०

२९

चंडायनमः॥ वाराह्यैनमः। इंद्राण्यै० विच्छेत्यै० मायाशक्त्यैनमः। धात्रे० विधा०
शंखनिधयेनमः। पद्मनिधये०। कलशद्वयेरेखायै०। ताप्यै० उन्मत्तभैरवायेति
गंधादिभिः पूजयेत्॥ पाशहस्तंचवरुणं आभसां पतिमीश्वरं॥ आवाहयामि
पश्चेस्मिन् वरुणायनमोनमः॥ नत्वा। वरुणायसांगायेत्यादिमाषभक्तबलिं॥
ततः आचम्यवायव्यांगत्वा पूर्ववत्कलशं प्रतिष्ठाप्य तत्र पुष्पदंतंसिद्धार्थंच
कपालभैरवंच पूजयेत्। दीपादयः। मृगारूढं धूम्रवर्णं चित्रांबरधरं युवा
नं वरध्वजदक्षिणवामहस्तद्वयं वायुं ध्यात्वा। एह्येहि पश्चे मम रक्षणायमृ
गाधिरूढः सहसिद्धसंघैः॥ प्राणाधिपः कालकवेसहायगृहाणपूजां भ
गवन्नमस्ते॥ भो वायो इहागच्छेहतिष्ठ सांगादि० कलशमावाह्य। तत्रवायवि
लिवायुं पूजयेत्॥ धूम्रांपताकां धूम्रध्वजंच वायो येतितेमंत्रेण धूपयेत्॥
वायुमाकाशगंचैव पवनं वेगवर्त्तिनं॥ आवाहयामिपश्चेस्मिन् पूजेयं प्रति

२९

गृह्यतां। अनाकारोमहौजाश्चपश्चाद्दृष्टगतिर्दिवि॥ तस्मैपूज्यायजगतोवाय
वेहनमाम्यिते। वायवेसांगायेत्यादि० एतं माषभक्तबलिं० ततः आचम्यउत्तरे
गत्वाप्रतिहारशंखं कलशद्वयं कलशद्वयं स्थाप्य। तत्रसार्वभौमंदिग्गजंन्य
सार्द्ध×
स्यभौमायनमइतिपूजयेत्। दीपादयः। ततः अथर्ववेदावृत्विजो उत्तरद्वा
रे शांतिसूक्तजपार्थं त्वेनत्वामहं वृणे। वृतोस्मि। वृहन्नेनोथर्ववेदोनुष्टुभो
रुद्रदेवतः॥ वैशंपायनविप्रेंद्रऋत्विक् त्वं मेमखभवेतिप्रसेकं वृत्वा। शंनोदेवी
तिगंधादिनाप्रपूज्य। ततोनरयुतो विमानस्थं कुंडलहारकेयूररुचिरंवर
दाभयदक्षिणवामभुजद्वयंमुकुटिनं महोदरं महाकायं हरितवर्णं कुबेरं ध्या
त्वा॥ एह्येहियक्षेश्वर यज्ञरक्षां विधत्स्वनक्षत्रगणेनसार्द्धं॥ सर्वौषधीभिः
पितृभिः सहैवगृहाणपूजांभगवन्नमस्ते। भो सोम इहागच्छेहतिष्ठसांगा
ल
येत्यादि० सोमं कैरालयो रावाह्य। सोमोधेनुमित्तिसोमं पूजयामि। हरि

22

तांपताकां हरितध्वजंच आप्यायस्वेतिउच्छ्रयेत्॥ द्वारश्रियै॰ ऊर्ध्वदेहल्यां
अधः वास्तुपुरुषाय॰ स्तंभयोः महाकालाय भृंगिणे नमः॥ चामुंडायै॰ म
हालक्ष्म्यै॰ विघ्नराजाय नमः। मायानुरक्त्यै॰ धात्रे॰ विधात्रे॰ शंखनिधये॰ पद्म
निधये॰ कलशाद्यै॰ तार्क्ष्यै॰ वेण्यै॰ भीषणभैरवाय नमः॥ सर्वनक्षत्रमध्येतु
सोमोराजाव्यवस्थितः॥ तस्मैसोमाय देवाय नक्षत्रपतये नमः॥ इतिनत्वा॥
सोमायेत्यादि। माषभक्तबलिं॥ ततः आग्नेय्यां ईशान्यां पूर्ववत्कलशंनिधाय
सुप्रतीकंदिग्गजंमंगलंचसंहारभैरवंपूजयेत्॥ दीपोदेयः॥ वृषारूढं दक्षि
णवामहस्तयोर्वरत्रिशूलधरंत्रिनेत्रंशुक्लवर्णंईशानंध्यात्वा॥ एह्येहि विश्वेश्व
र नस्त्रिशूलकपालखट्वांगपाणे नसार्द्ध॥ लोकेनयज्ञेश्वर यज्ञसिध्यैगृहाण
पूजांभगवन्नमस्ते॥ भोईशान इहागच्छेहतिष्ठ सांगाये त्यादि॰ कलशे
आवाह्य। तमीशानमितिईशानंगंधादिभिः संपूज्य। श्वेतांसर्ववर्णांवाप

22

ताकांध्वजंच अभित्वादेवसवितरित्युच्छ्रयेत्॥ वृषस्कंधसमारूढं शूलहस्तं त्रि
लोचनं॥ आवाहयाम्यहं देवमस्मिन्पूजेयं प्रतिगृह्यतां॥ सर्वाधिपो महादेव ईशा
नः शुक्ल ईश्वरः॥ शूलपाणिर्विरूपाक्षस्तस्मै नित्यं नमो नमः॥ नत्वा सांगायेत्या
दि॰ ईशानाय एतं माषभक्तबलिं॰॥ ततः आग्नेय्येशानपूर्वयोर्मध्ये। ऊर्ध्वमु
द्दिश्य अक्षसूत्रंकुशमुष्टिधरोर्ध्वाधोदक्षिणकरंस्त्रुक्स्त्रुवंचकमंडलुधरोर्ध्वा
धोवामकरद्वयंचतुर्भुजंश्मश्रुलंबोदरं रक्तवर्णंब्रह्माणंध्यात्वा॥ एह्येहि सर्वा
धिपतेसुरेंद्रलोकेनसार्द्धं पितृदेवताभिः॥ सर्वस्यधाताह्यमितप्रभावोविशा स्य×
ध्वरंनः सततंशिवाय॥ भोब्रह्मन्निहागच्छेहतिष्ठ सांगादि॰ ब्रह्माणं आवा
ह्य। ब्रह्मणस्पतेसुयमस्येतिगंधादिभिःसंपूज्य। अंतरिक्षायपर्वणिलू। रक्तां
पताकांरक्तध्वजंच ब्रह्मणस्पतेत्वमस्येत्युच्छ्रयेत्॥ पद्मयोनिश्चतुर्मूर्त्तिर्वेद
वासःपितामहः॥ यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मैनित्यंनमोनमः। नत्वाब्रह्मणे

२३

सांगायेसादि॰ बलिः। ततः आचम्य पश्चिमनैरृत्ययोर्मध्ये। अथः उद्दिश्य अनं
तशयनासीनं फणासप्तकमंडितं पद्मशंखधरो ध्वाधो दक्षिणाकरद्वयं चक्रग
दाधरो ध्वाधो वामकरद्वयं नीलवर्णं अनंतं ध्यात्वा। एह्येहि पातालधरामरेंद्र
नागांगनाकिंनरगीयमाना।। यक्षोनरेंद्रामरलोकसंघैरनंतरक्षाध्वरमस्म
दीयं।। भो अ नंत इहागच्छ इह तिष्ठेति सांगादि॰ अनंतमावाह्य। यस्या अनं
तइति मंत्रेण अनंताय नमः इति गंधादिभिः पूजयेत्। भूमिं च पूजयेत्। मेघव
र्णं पिताक्तं श्वेतध्वजं च नमोस्तु सर्पेभ्य इत्युपस्थापयेत्।। योसावनंतरूपेण ब्रह्मां
डं सचराचरं। पुष्पवद्धारयेन्मूर्ध्नि तस्मै नित्यं नमो नमः।। नत्वा अनंतायसां
गायेसादि एतं माषभक्तबलिं॰। ततः आचम्य मंडपमध्ये श्वेतचामरकिंकि
णीयुतः अस्कंध दंडोद्दण्ड लसद्दीर्घत्रिहस्तविस्तृतो महाध्वजो निचित्र व
र्ण इंद्रस्य वज्रमइति मंत्रेण स्थाप्यः ब्रह्मजज्ञानमिति च तत्रैव ब्रह्मपूजनं

२३

ध

वंशेषु किंनरेभ्यो नमः।।

कार्यं।। ततो मंडपषोडशस्तंभेषु सर्वेभ्यो देवेभ्यो नमः।। पृष्ठे पन्नगेभ्यो नमः इति पू
जयेत्। केचित्तु भूपसर्वस्तंभदेवता ईशानादि प्रदक्षिणाक्रमेण पूजयेदित्याहु
स्तद्यथा। ईशानस्तंभे ब्रह्मजज्ञानमिति ब्रह्माणं पूजयेत्। एह्येहि ब्रह्मन्नत्र ब्र
ह्मस्तंभे गंधादिभिः प्रतिगृह्यतां। एवमन्येष्वपि। द्वितीये इदं विष्णुरिति विष्णुं। तृ
तीये नमः शंभवेति शंभुं।। चतुर्थे त्रातारमिंद्रमितींद्रं। पंचमे चित्रं देवानामि
ति भास्करं। षष्ठे गणानां त्वेति विनायकं।। सप्तमे यमाय सोममिति यमं। अष्ट
मे आयं गौरिति सर्पान्। नवमे आश्विना वर्त्तिरिति अश्विनौ। दशमे मरुतो यस्य
हीति मरुतः। एकादशे उ घन्नयेति मार्त्तंडं। द्वादशे वायवाहीयो वायुं। म
ध्येवेदिकोणेशानस्तंभे त्रयोदशे ज्मयात्रेति वसून्। चतुर्दशे नमुत्वापा
प्य इति पुरंदरं।। पंचदशे बृहस्पत इति गुरुं। षोडशे विश्वकर्मन्नूहविषेति
विश्वकर्माणं। ततः मंडपाद्बहिः पूर्वस्यां दिशि किंचिद्भूमिमुपलिप्य तत्रोपवि

२५

रूपा। त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ॥ ब्रह्मविष्णुशिवैः सार्द्धं रक्षां
कुर्वंतु तानि मे ॥ देवदानवगंधर्वयक्षराक्षसपन्नगाः ॥ ऋषयो मानवो गा
वो देवमातर एव च ॥ सर्वे मम ध्वरे रक्षां प्रकुर्वंतु मुदान्विताः ॥ ब्रह्मा विष्णुश्च
रुद्रश्च क्षेत्रपालगणैः सह । रक्षंतु मंडपं सर्वे घ्नंतु रक्षांसि सर्वतः । त्रैलोक्य
स्थेभ्यः स्थावरेभ्यो भूतेभ्यो नमः । त्रैलोक्यस्थेभ्यश्चरेभ्यो भूतेभ्यो नमः ॥
ॐ ब्रह्मणे नमः विष्णवे नमः । शिवाय नमः । देवेभ्यो नमः । दानवेभ्यो० गं
धर्वेभ्यो० यक्षेभ्यो नमः । राक्षसेभ्यो नमः । पन्नगेभ्यो० ऋषिभ्यो० मनुष्ये
भ्यो० गोभ्यो नमः । देवमातृभ्यो नमः इति प्रत्येकं संपूज्य पुष्पादिना पूर्वमंत्रै
रेव तस्यां भूमौ एतेभ्य एव माषभक्तबलिं दद्यात् । ततो यजमानः साचार्यः
सऋत्विक् प्रक्षालितपाणिपाद आचांतः प्राग्द्वारेण मंडपं प्रविशेत् ॥ इति
मंडपपूजनं ॥ ॥ इति ऋग्वेदमंत्रैर्मंडपप्रतिष्ठा समाप्ता ॥ ॥ यजुर्वेदया

२५

दयस्तु स्वस्वमंत्रैः कुर्युः ॥ ॥ ततो वेद्युपरि जलाद्यायवस्त्रोऽन्नगं सर्वतोभ
द्रं वा लिखित्वा तत्र मंडलदेवता आवाहयेत् ॥ तद्यथा ॥ ब्रह्मजज्ञानमित्यनेन
पुष्पाक्षतैर्मंडलकर्णिकायां ब्रह्मणे नमः । ब्रह्माणं आवाहयामि । मंडला
द्बहिः प्रागादिक्रमेण तत्तन्मंत्रैः लोकेशान् । त्रातारमिंद्रमिति इंद्राय नमः ।
इंद्रं आ० अग्निं दूतमिति अग्नये० अग्निं आ० यमाय सोममिति यमाय०
यमं० । मोषुण इति निर्ऋतये नमः निर्ऋतिं आ० तत्वायामीति वरुणाय०
वरुणं० तव वायविति वायवे नमः । वायुं आ० सोमो धेनुमिति सोमा० सो
मं आ० तमीशानमिति ईशानाय० ईशानं आ० । ईशानशक्रांतराले वसू
नां वेति वसुभ्यो० वसून् आ० शक्राग्न्यंतराले सहस्राणि सहस्रश इति
रुद्राय नमः रुद्रं आ० अग्नियमांतराले वणमहां असीति० आदित्येभ्यो
आदित्यान् आ० यमनिर्ऋत्यंतराले मरुतो यस्य हीति मरुद्भ्यो नमः । म

रुतः॰ निर्ऋतिवरुणांतराले विश्वेदेवासइति। विश्वेभ्योदेवेभ्योनमः। विश्वा
न्देवान् आ॰ वरुणवायव्यांतराले पत्नेनयज्ञमिति। साध्येभ्योदेवेभ्योनमः
साध्यान्देवान् आ॰ वायुसोमांतराले यावांकशेति। अश्विभ्यां॰ अश्विनौ
आ॰ सोमेशानांतराले यदक्रंदइति। स्कंदाय॰ स्कंदं आ॰ ब्रह्मेंद्रांतराले इदं
विष्णुरिति। विष्णवेनमः विष्णुं आ॰ ब्रह्माग्न्यंतराले गणानांत्वेति। ग
णपतयेनमः। गणपतिं आ॰ ब्रह्मयमयोर्मध्ये उदीरतामवरइति
पितृभ्योनमः पितॄन् आ॰ ब्रह्मनिर्ऋत्यंतराले अप्सरसांगंधर्वाणामि
ति। गंधर्वाप्सरोभ्यो॰ गंधर्वाप्सरसः। ब्रह्मवरुणांतराले गौरीमिमा
येति सप्तमातृभ्यो॰ सप्तमातृः॰ ब्रह्मवायव्यांतराले नमोस्तुसर्पे
भ्यइति। सर्पेभ्यो॰ सर्पान्॰ ब्रह्मसोमांतराले जातवेदसइतिदुर्गा
यै॰ दुर्गां॰ ब्रह्मेशानांतराले इमंमेगंगइति गंगायमुनाभ्यां॰ गंगाय

मुने॰ मंडलांतः पश्चेशानदलाग्रे व्याहृतिभिः दक्षायन॰ दक्षं॰ पूर्वे वि
ष्णवेविष्णुं॰ आग्नेय्यांदुर्गायै॰ दुर्गां॰ दक्षिणेस्वधायै॰ स्वधां॰ नैर्ऋत्ये
मृत्यवेन॰ मृत्युं॰ पश्चिमेरोषा॰ रोषं॰ वायव्ये उदधिभ्यो॰ उदधीन्॰
सौम्येमरुद्भ्यो॰ मरुतः॰ मध्येगणपतये॰ गणपतिं॰ ब्रह्मपाः पा
दमूले कर्णिकायांपृथ्व्यै॰ पृथ्वीं॰ तदुपरिरुद्रायदेवं। ब्रह्मोपरितःपू
र्वादिक्रमेण ऋग्वेदाय॰ ऋग्वेदं॰ यजुर्वेदाय॰ यजुर्वेदं॰ सामवेदाय॰
सामवेदं॰ अथर्ववेदाय॰ अथर्ववेदं॰ मंडलबाह्येपूर्वादिक्रमेण दिक्
पालायुधानि॰ वज्राय॰ वज्रं॰ शक्त्यै॰ शक्तिं॰ दंडाय॰ दंडं॰ खड्गा
य॰ खड्गं॰ पाशाय॰ पाशं॰ अंकुशाय॰ अंकुशं॰ गदायै॰ गदां॰ त्रि
शूलाय॰ त्रिशूलं॰ तद्बाह्येतेषांवाहनानि। ऐरावताय॰ ऐरावतं॰
मेषाय॰ मेष। महिषाय॰ महिषं॰ नराय॰ नरं॰ मकराय॰ मकरं॰ म

गाय० मृगं० त्रिविकाये० त्रिविकं० वृषाय० वृषं० तद्वाह्ये गोतमाय० गौ
तमं० भरद्वाजाय० भरद्वाजं० विश्वामित्राय० विश्वामित्रं० कश्यपाय०
कश्यपं० जमदग्नये० जमदग्निं० वसिष्ठाय० वसिष्ठं० अत्रये० अत्रिं०
अरुंधत्यै० अरुंधतीं० तद्वाह्ये ग्रहान्० सूर्याय० सूर्यं० सोमाय० सोमं०
अंगारकाय० अंगारकं० बुधाय० बुधं० बृहस्पतये० बृहस्पतिं०
शुक्राय० शुक्रं० शनैश्चराय० शनैश्चरं० राहुकेतुभ्यां० राहुकेतू०
तद्वाह्ये ऐंद्र्यै० ऐंद्रीं० कौमार्यै० कौमारीं० ब्राह्म्यै० ब्राह्मीं० वाराह्यै०
वाराहीं० चामुंडायै० चामुंडां० वैष्णव्यै० वैष्णवीं। माहेश्वर्यै नमः०
माहेश्वरीं० वैनायक्यै० वैनायकीं॥ ॥सर्वतोभद्रदेवतास्थापनं कृत्वा संपूज्य॥ अथाचार्यः॥ अग्न्यायतनं संमृज्य कुशोदकेन संप्रोक्ष्य
इदं विष्णुरिति मंत्रेण परिमेखलायां ब्रह्मजज्ञानमिति मंत्रेण ब्रह्मा

मध्ये मेख-
९

णं॥ अधोमेखलायां कृष्णवर्णालंकृतायां रुद्रायेति मंत्रेण रुद्रं॥ योन्यां
गौरीर्मिमायेति मंत्रेण योन्यां गौरीं॥ एताभ्य एकं संपूज्य॥ कुंडे अग्निं
प्रतिष्ठाप्य॥ चरुश्रपणादि उविरासादनांतं कृत्वा॥ ततः सर्वे पिहोतारः
तमेवाग्निं स्वस्वकुंडे प्रणयेयुः॥ लंबर्थीकर्मांतं रक्षेयुः॥ अद्येत्यादि अमु
ककर्मकर्तुर्रक्षोविघ्नोपशमनं संपन्नकामो वा लुप्तजनमहं करिष्ये॥
ततो मंडपनैऋत्ये कोणे मृदाहस्तमितां द्विहस्तां वा वेदिं विधाय वेद्याश्च
तुर्षु कोणेषु आग्नेयादिषु चतुरः शंकून्॥ विरालुभूतले नागालोक
पालाश्च सर्वे राः॥ मंडपेनरालेख्यं तु आंयुर्बलकरा सदा॥ अनेन मंत्रे
णारोपयेत्॥ प्रतिरोपणं मंत्रा वालिः॥ षंकुपार्श्वे माषभक्तबलिमाग्ने
यादिक्रमेण दद्यात्॥ तस्य मंत्राः॥ अग्निभ्योप्यथ सर्पेभ्यो ये चान्ये तत्स
माश्रिताः॥ तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तमं॥ नैर्ऋत्ये साधिपालिश्चे

वन्नै॥ ॐ सांयं नराः स्त्रसाः॥ बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमं॥ ॐ नमो
वायुरक्षेभ्यो ये चान्ये तान् समाश्रिताः॥ बलिं तेभ्यः प्रयच्छामि सर्वे गृण्हंतु
मंत्रितं॥ ॐ रुद्रेभ्यः श्चैव सर्पेभ्यो ये चान्ये तान् समाश्रिताः॥ बलिं तेभ्यः प्रयच्छामि
गृण्हंतु सततो सुकाः॥ इति मंत्रचतुष्टयेन बलिचतुष्टयं दद्यात्॥ ततो वेद्युपरि
वस्त्रं कुंकुमादिना सुवर्णरजतादिशलाकया नवरेखाः कुर्यात्॥ रेखासु दे
वताः॥ ॐ लक्ष्मै नमः॥ ॐ यशोवत्यै०॥ कांतायै०॥ सुप्रीतायै०॥ विमलायै०॥
श्रीवायै०॥ सुभगायै०॥ सुमत्यै०॥ इडायै नमः॥ एताभिः प्रागग्रा उदक्संस्था
नवरेखाः कुर्यात्॥ ॐ धान्यायै०॥ प्राणायै०॥ विशालायै०॥ स्थिरायै०॥
भद्रायै०॥ जयायै०॥ निशायै०॥ विरजायै०॥ विभवायै०॥ एताभिः उद
गग्राः प्राक्संस्थाः नवरेखाः कुर्यात्॥ मध्ये पंकजे मंडूकादि पीठदेवताः
पूजयेत्॥ तद्यथा॥ पद्ममध्ये॥ मंडूकाय नमः॥ कालाग्निरुद्राय०॥

कूर्माय०॥ वराहाय०॥ अनंताय०॥ पृथिव्यै०॥ स्कंदाय०॥ अंकुराय०॥ नलाय०
पद्माय०॥ पत्रेभ्यो०॥ कर्णिकायै०॥ केसरेभ्यो०॥ सिंहासनाय नमः॥ पूर्वादिच
तुर्दिक्षु पत्रेषु॥ धर्माय०॥ ज्ञानाय०॥ वैराग्याय०॥ ऐश्वर्याय०॥ विदिक्षु
अधर्माय०॥ अज्ञानाय०॥ अवैराग्याय०॥ अनैश्वर्याय नमः॥ मध्ये॥
ॐ सत्वाय०॥ शुद्धवर्णाय०॥ रक्तवर्णाय०॥ तमसे कृष्णवर्णाय०॥ अग्नि
मंडलाय०॥ सोममंडलाय०॥ सूर्यमंडलाय०॥ आत्मतत्वाय०॥ विद्यात
त्वाय०॥ शिवतत्वाय०॥ आत्मने०॥ अंतरात्मने०॥ जीवात्मने०॥ परमात्मने०
पद्मस्य पूर्वादिक्रमेण॥ अणिमायै०॥ महिमायै०॥ लघिमायै०॥ गरिमा
यै०॥ प्राप्त्यै०॥ प्राकाम्यै०॥ ईशितायै०॥ वशितायै०॥ पद्ममध्ये॥ सर्वसि
द्ध्यै०॥ सर्वज्ञानक्रियात्मने०॥ अव्यक्ताय०॥ योगपीठात्मने नमः॥ इति पी
ठदेवताः॥ अथ ब्रह्मादीनां ध्यानपूर्वक आवाहनं कुर्यात्॥ अक्षमा

शोंसूत्रं दक्ष नाभि दंडकमंडलुं॥ ध्यानमष्ट नयन यजेन्मध्ये। चतुरासनं॥ स
र्वे च तु भुजा देवा वास्तुदेहव्यवस्थीताः॥ कृतांजलि पुटा ऊर्ध्वे खदुरेनटक
पाणयः॥ ब्रह्माणं संनीरीक्षंते तद्वक्त्राभिमुखाश्रते। स्वस्वस्थानस्थिताः
श्चैव साधारणमुदाहृतं॥ मध्यमपद चतुष्के वास्तोर्नीध्यो ब्रह्मणे नमः॥ र
क्त वर्णं आवाहयामि॥ इति स्थापयेत्॥ पूर्वपदद्वये दक्षिणहस्ते अर्यम्णे०॥
श्वेतवर्णं अर्यमणमा०॥ दक्षिणपदद्वये जठर दक्षिणे विवस्वताय०॥ रक्त
वर्णं विवस्वतमा०॥ पश्चिमपदद्वये जठर वामे मित्राय० सुवर्णाभं मित्रं०॥०
उदकपादद्वये नामहस्ते पृथ्वीधराय० कृष्ण वर्णं पृथ्वीधरं०॥ आग्नेयपदे
तदर्द्धे दक्षिणहस्ते सावित्राय० धूम्रवर्णं सावित्रं०॥ आग्नेयदक्षिणपदा
र्द्धे दक्षिणहस्ते सवित्रे० नीलवर्णाभं सवितारं०॥ आग्नेयदक्षिणपदार्द्धे
दक्षिहस्ते विवस्त्रे० कृष्णवर्णं सवितारं॥ नैऋत्यपदार्द्धे वृषणयोः विबुधा

धिपाय० अरुणवर्णं विबुधाधिपं०॥ नैऋत्यपश्चिमपदार्द्धे मेढ्रे जयाय०
शुक्लवर्णं जयं०॥ वायव्यपददक्षिणार्द्धे वामहस्ते राजयक्ष्मणे० श्वेतवर्णं
राजयक्ष्माणं०॥ वायव्यपदोत्तरार्द्धे वामहस्ते रुद्राय० श्वेतवर्णं रुद्रं०॥१२
ईशानपदपश्चिमार्द्धे मुखे अपान्नय० गोक्षीरधवलवर्णं अपानं०॥ ई
शानपदपूर्वार्द्धे उरसि अपवत्साय० अपाकुसुमवर्णं अपवत्सं०॥ ई
शानपददक्षिणार्द्धे शिरसि शिखिने० उद्यद्दिनकराभं शिखिनं०॥ तद्द
क्षिणसार्द्धपदे दक्षिणनेत्रे पर्जन्याय० अंजनसंनिभं पर्जन्यं०॥ तद्दक्षिण
पदद्वये दक्षिणश्रोत्रे जयंताय० अजसंकाशं जयंतं०॥१६॥ तद्दक्षिणपदद्व
ये दक्षिणांसे कुलिशायुधाय० अंजनदीप्तिं कुलिशायुधं०॥१७॥ तद्द
क्षिणपदद्वये दक्षिणबाहौ सूर्याय० रक्तवर्णं सूर्यं०॥१८॥ तद्दक्षिणपद
द्वये दक्षिबाहवे ससाय० चित्रवर्णं ससं०॥१९॥ तद्दक्षिणसार्द्धपदे द

३२
२९

क्षिणकुर्परे ॐ भरताय० बंधुकपुष्पाभं भरतं०॥२०॥ तद्दक्षिणाग्नय
पदार्धे दक्षिणप्रबाहौ ॐ आकाशाय० कुंदपुष्पाभं आकाशं०॥२१॥
तत्पश्चिमार्धे दक्षिणबाहवे ॐ वायवे० धूम्रवर्णं वायुं०॥२२॥ तत्पश्चि
मसार्धे पदे दक्षिणमणिबंधे ॐ पूष्णे० रक्ताभं पूषणं०॥२३॥ तत्पश्चिम
पदद्वये दक्षिणपार्श्वे ॐ वितथाय० इंद्रचापाभं वितथं०॥२४॥ तत्पश्चि
मपदद्वये दक्षिणपार्श्वे ॐ गृहक्षताय० विद्युद्वर्णाभं गृहक्षतं०॥२५॥ तत्पश्चि
मपदद्वये दक्षिणहस्ते ॐ यमाय० अंजनसंकाशं यमं०॥२६॥ तत्पश्चिम
पदद्वये दक्षिणजानौ ॐ गंधर्वाय० पद्मरागाभं गंधर्वं०॥२७॥ तत्पश्चिमसा
र्धे पदे दक्षिणजंघायां ॐ भृंगराजाय० मरकताभं भृंगराजं०॥२८॥ तत्पश्चि
मनैर्ऋत्यपदार्धे दक्षिणस्फिचि ॐ मृगाय० मेघवर्णं मृगं०॥२९॥ तद्
नरार्धे पादयोः ॐ पितृभ्यो० पावकवर्णान् पितॄन्॥३०॥ तदुत्तरसार्ध

२९
३३

पदे वामस्फिचि ॐ दौवारिकाय० पीतवर्णं दौवारिकं०॥३१॥ तदुत्तरपद
द्वये वामजंघायां ॐ सुग्रीवाय० नीलकंठाभं सुग्रीवं०॥३२॥ तदुत्तरपदद्व
ये वामजानुनि ॐ पुष्पदंताय० चंद्राभं पुष्पदंतं०॥३३॥ तदुत्तरपदद्वये वा
मोरौ ॐ वरुणाय० स्फटिकाभं वरुणं०॥३४॥ तदुत्तरपदद्वये वामपार्श्वे
ॐ असुराय० मरकताभं असुरं०॥३५॥ तदुत्तरसार्धपदे वामपार्श्वे ॐ शोषा
य० कुसुंभसंकाशं शोषं०॥३६॥ तदुत्तरवायव्यपदार्धे वाममणिबंधे ॐ
पापाय० इंद्रनीलाभं पापं०॥३७॥ तत्प्राक्पदार्धे वामबाहौ ॐ रोगाय० धू
म्रवर्णाभं रोगं०॥३८॥ तत्प्राक्सार्धपदे वामप्रबाहौ ॐ अहये० शंखेंदुस
न्निभं अहिं०॥३९॥ तत्प्राक्पदद्वये वामकुर्परे ॐ मुख्याय० मौक्तिकाभं
मुख्यं०॥४०॥ तत्प्राक्पदद्वये वामबाहौ ॐ भल्लाटकाय० अनलप्रभाभं
भल्लाटकं०॥४१॥ तत्प्राक्पदद्वये वामबाहवे ॐ सोमाय० स्फटिकसंका

शं सौमं०॥४२॥ ततो भल्लाटपदद्वये वामांशे ॐ सर्पाय० रक्तोत्सङ्गभं सर्पं०॥
४३॥ ततो मुख्यपदे वामश्रोत्रे ॐ अदित्यै० कपिलवर्णां अदितिं०॥४४
ततोऽर्गलपदे वामश्रोत्रे ॐ दित्यै० दितिं आवाहयामि॥४५॥ ततः मध्यमप
दचतुष्टये ब्रह्मणोत्तरभागे सुवर्णप्रतिमायां कलशे वास्तुमावाह्य ध्याये
त्तद्यथा॥ ईशान्यशिरसं नैरृत्यपादं आग्नेयजानुकं वायव्यकूर्परं
आकुञ्चितकरं उत्तानं वास्तुपुरुषं आवाहयामि॥ ॐ भूः वास्तुपुरुष०
ॐ भुवः वास्तुपुरुष०॥ ॐ स्वः वास्तुपुरुष० ॐ भूर्भुवःस्वः वास्तुपुरुष०
वास्तोष्पते मैत्रावरुणिर्वसिष्ठो वास्तोष्पतिस्त्रिष्टुप्॥ वास्तोष्पत्यावाह
ने०॥ ॐ वास्तोष्पते प्रति०॥ ॐ ह्रीं ॐ नमो भगवते वास्तुपुरुषाय महा
बलपराक्रमाय सर्वदेवाधिदेवाय पराश्वतशरीराय ब्रह्मपुत्रा
य सकलब्रह्माण्डधारिणे भूभारार्पितमस्तकाय पुरपत्तनप्रासादगृह

वापीसरःकूपादिसन्निवेशसान्निध्यकराय सर्वसिद्धिप्रदाय प्रसन्नवदनाय
विश्वंभराय परमपुरुषस्वरूपाय चक्रखड्गवरदाभयहस्ताय वास्तो नमस्ते
नमस्ते॥ एह्येहि भगवन्वास्तोष्पते अस्मिन्सर्वसिद्धये॥ तव पूजां विधास्यामि य
शोऽपि निवृत्तये॥ एवमावाह्य स्थापयेत्॥ ततो मंडलाद्बहिः ईशान्यां चरक्यै०
शंखवर्णां चरकीं०॥ आग्नेय्यै विदार्यै० पावकवर्णां विदारीं०॥ नैरृत्ये पूतनायै०
हिमसंकाशां पूतनां०॥ वायव्ये पापराक्षस्यै० मेघवर्णां पापराक्षसीं०॥ मंडला
द्बहिः पूर्वे स्कंदाय० श्वेतवर्णं स्कंदं०॥ दक्षिणे अर्यम्णे० रक्तवर्णं अर्यमणं०॥ पश्चि
मे जृम्भकाय० पीतवर्णं जृम्भकं०॥ उत्तरे पिलिपिच्छाय० कृष्णवर्णं पिलिपिच्छं०॥
क्रमेण पूर्वादि॥ इंद्राय० पीतवर्णं इंद्रं०॥ यमाय० कृष्णवर्णं०॥ अग्नये० रक्तं० अग्निं
निरृतये० नीलवर्णं निरृतिं०॥ वरुणाय० श्वेत० वरुणं०॥ वायवे० धूम्र० वायुं०॥
कुबेराय० हरित० कुबेरं०॥ ईशानाय० श्वेत० ईशानं०॥ अनंताय० मेघ० अनंतं०॥ ब्रह्मणे० र
क्तवर्णं ब्रह्माणं०॥ एवमावाह्य॥ स्थापितां वास्तोः सह संपूज्य॥ ॐ वास्तुपुरुषाय सां

गायत्सपरिवाराय आसनं समर्पयामि॥ इत्यादि मंत्रपुष्पांतं दत्वा॥ प्रार्थयेत्॥ यज्ञ
भागं प्रतीक्षस्व पूजां चैव बलिं मम॥ नमो नमस्ते देवेश भव स्वस्ति करो मम॥ इति प्रा
र्थ्य॥ ब्रह्मणे० दध्योदनबलिं स० मि॥ पंचवस्तारः॥ चरक्यादिनां बलिदानं कुर्यात्
अथवा ब्रह्मादिभ्यः चरक्यादिभ्यः दध्योदन बलिं स० मि॥ मंडलादीशान्ये कल
शं मंत्रपूर्वकं स्थाप्य तीर्थोदकावाह्य वरुणं संपूज्य॥ शिवं वास्त्विति भवंतो ब्रुवं
त्विति यजमानो ब्रूयात् अस्तु शिवं वास्तु इति प्रतिवचनं॥ एवं त्रिः॥ कल
शोदकेन यजमानमभिषिच्य॥ ततो मंडपप्राक् दक्षिणेन ईशान कोणादारभ्य
ईशानपर्यंतं त्रिसूत्र्या पावमानेन रक्षोघ्नेन च वेष्टयेत्॥ ततो दुग्धपूर्ण कुं
भेन जलपूर्ण कुंभेन पूर्वसूत्रकृत्वये नावच्छिन्न धाराद्वयं दत्वा प्रार्थनां कु
र्यात्॥ यथा मेरुगिरेः शृंगं वास्तो मामलयो सदा॥ तथा ब्रह्मादिभिर्देवैर्मम
यज्ञे स्थिरो भव॥ पूजितोसि मया वास्तो गंधाद्यैरुपचारकैः॥ प्रसीद पाहि वि
श्वेश देहि मे सर्वजं फलं॥ इति वास्तुं प्रार्थ्य॥ यांतु देवेति विसृज्य॥ इति

यज्ञवास्तुपूजनं संपूर्णं॥ आचम्य प्राणानायम्य देशकालौ संकीर्त्य अद्य०
अमुक कर्मांगं ग्रह पीठ देवता स्थापनं पूजनं च करिष्ये॥ इति संकल्प्य॥
प्रणवस्य परब्रह्म ऋषिः॥ परमात्मा देवता॥ देवी गायत्री देव्युष्णिगनुष्टुप् छं
दांसि॥ सूर्यावाहने विनियोगः॥ तत्र ग्रहपीठमध्ये वर्तुले द्वादशांगुले
मंडले प्राङ्मुखं सूर्यं रक्तपुष्पाक्षतैः आकृष्णेन हिरण्यस्तूपः सविता त्रिष्टुप्
सूर्यावाहने०॥ आकृष्णेन० ॐ भूर्भुवः स्वः कलिंगदेशोद्भव काश्यपसगोत्र
सूर्य इहागच्छ इह तिष्ठ सूर्या० सूर्यं०॥ आग्नेये चतुरस्रे चतुर्विंशांगुले मंडले प्र
त्यङ्मुखं सोमं श्वेतपुष्पाक्षतैः॥ आप्यायस्व गोतमः सोमो गायत्री
सोमावा० ॐ आप्यायस्व०॥ ॐ भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयसगोत्र सो
म० यामि॥ ततः दक्षिण त्रिकोणे चतुरंगुले मंडले रक्तपुष्पाक्षतैः॥ ॐ अग्निर्मू
र्द्धा विरूपोंगारको गायत्री॥ अंगारका०॥ ॐ अग्निर्मूर्द्धा०॥ अवंतिदेशोद्भव भार
द्वाजसगोत्र अंगारक इ० यामि॥ ततः ईशान्ये द्विरंगुले बाणाकारे मंडले दंड०

२९
१२

मुखं बुधं पीतपुष्पाक्षतैः ॥ उद्बुध्यस्वं बुधः सौम्यो बुध त्रिष्टुप् ॥ बुधावा० ॐ उद्बु
ध्यस्वं० ॥ ॐ भूर्भुवः स्वः मगधदेशोद्भव अत्रेयसगोत्र बुध० मि ॥ ततः उत्तरे दीर्घ
चतुरस्रे षडंगुले मंडले पीतपुष्पाक्षतैः बृहस्पतेग्र समदो बृहस्पति त्रिष्टुप् ॥ बृहस्पा०
ॐ बृहस्पते० ॥ ॐ भूर्भुवः स्वः बृहस्पते० सिंधुदेशोद्भव आंगीरस गोत्र इहा० यामि
ततः पूर्वे पंचकोणे नवांगुले मंडले प्राङ्मुखं शुक्रं बिल्वशुक्लपुष्पै० शुक्रः पारा
रः शुक्रो द्विपदा विराट् ॥ शुक्रा० ॥ ॐ शुक्रं शु० ॥ भोजकटदेशोद्भव भार्गवस० शु
क्र० ॥ ततः पश्चिमे धनुराकारे चतुरंगुले मंडले श० छ पुष्पाक्षतैः ॥ शमाग्निरिति विठिः
शनैश्चर उष्णिक् ॥ शनै० ॥ ॐ शमग्नि० ॐ भूर्भुवः स्वः सौराष्ट्रदेशोद्भव काश्यपस
शनैश्चर० ॥ ततः नैर्ऋत्ये शूर्पाकारे पंचाविंशांगुले मंडले दक्षिणाभिमुखं राहुं कृ
ष्णपुष्पाक्षतैः ॥ कया नो वामदेवो राहुर्गायत्री ॥ राहा० ॥ ॐ कया नः ॥ राठीनापु
रोद्भव पैठीनसिसगोत्र राहो० ॥ ततः वायव्ये ध्वजाकारे पंचविंशांगुले मंडले
शुक्लगंधपुष्पाक्षतैः ॥ केतुं कृण्वन्मधुच्छंदाः केतुर्गायत्री केत्वावाहने विनि० ॥
ॐ केतुं कृण्वन्० ॥ ॐ भूर्भुवः स्वः ॥ अंतर्वेदिसमुद्भव जैमि ॥

२२
२९

निसगोत्र केतो इहागच्छ इह तिष्ठ केतुं आवाहयामि ॥ ॥ अथाग
धिदेवताः । त्र्यंबकं वसिष्ठो रुद्रो नुष्टुप् ईश्वरमावाहने विनियो
गः । ओं त्र्यंबकं यजामहे० ॐ भूर्भुवः स्वः त्र्यंबक इहागच्छ इह
तिष्ठ । सूर्य दक्षिणपार्श्वे त्र्यंबकं आवाहयामि० गौरीर्मिमाय दी
र्घतमा उमा जगती उमावा० ओं गौरीर्मिमाय सलिलानि तक्षती०
ॐ भूर्भुवः स्वः उमे इहागच्छ इह तिष्ठ । सोम दक्षिणपार्श्वे गौरीं
आवाहयामि ॥ यदक्रंदो दीर्घतमा स्कंदस्त्रिष्टुप् । स्कंदावाहने वि०
ॐ यदक्रंदः प्रथमं जायमान० ॐ भूर्भुवः स्वः स्कंद इहागच्छ इ
ह तिष्ठ । भौम दक्षिणपार्श्वे स्कंदं आवाहयामि० विष्णोर्नुकं दीर्घ
तमा विष्णुस्त्रिष्टुप् ॥ नारायणावाह० ओं विष्णोर्नुकं वीर्याणि प्र

वोचं० ॐ भूर्भुवः स्वः नारायण इहागच्छ इह तिष्ठ बुध दक्षिण
पार्श्वे नारायणं आवाहयामि॥ ब्रह्मजज्ञानं गोतमो वामदेवो त्रि
ष्टुप् ब्रह्मावाहने वि० ॐ ब्रह्मजज्ञानं० ॐ भूर्भुवः स्वः ब्रह्म
न् इहागच्छ इह तिष्ठ। बृहस्पति दक्षिणपार्श्वे ब्रह्माणं आवा०॥
इंद्रं वो मधुच्छंदा इंद्रो गायत्री इंद्रावाहने वि०। इंद्रं वो विश्वत
स्परि। ॐ भूर्भुवः स्वः भो इंद्र इहागच्छ इह तिष्ठ। शुक्र दक्षिण
पार्श्वे इंद्रं आवाहयामि॥ यमाय सोमं यमो यमोनुष्टुप् यमावा
हने वि० यमाय सोमं सुनुत। ओं भूर्भुवः स्वः यम इहागच्छ इह
तिष्ठ। शनि दक्षिणपार्श्वे यमं आवाहयामि॥ मोषुणो घोरः क
ण्वः कालो गायत्री कालावाहने वि० मोषणः परापरा० ओं भू

र्भुवः स्वः काल इहागच्छ इह तिष्ठ। राहु दक्षिणपार्श्वे कालं आवा
हयामि॥ उषो वाजं प्रस्कण्व चित्रगुप्तो गायत्री चित्रगुप्तावाहने वि०
उषो वाजं हि वस्व० ॐ भूर्भुवः स्वः चित्रगुप्त इहागच्छ इह तिष्ठ के
तु दक्षिणपार्श्वे चित्रगुप्तं आवाहयामि॥ ॥ इत्यधिदेवताः॥ ॥
अग्निं दूतं मेधातिथिरग्निर्गायत्री। अग्न्यावाहने वि० अग्निं दूतं
वृणीमहे० भो अग्ने इहागच्छ इह तिष्ठ। सौमैवैवामे पार्श्वे सूर्यवाम
पार्श्वे अग्निं आवाहयामि० अप्सु मे मेधातिथिरापोनुष्टुप्। अपा
वाहने वि० अप्सु मे सोमो अब्रवीत्। ओं भूर्भुवः स्वः आपः इहा
गत्य इह तिष्ठ सोम वामपार्श्वे अपः आवाहयामि॥ स्योना मेधाति
थिर्भूमिर्गायत्री। भूम्यावाहने वि० स्योना पृथिवि भव। ओं भूर्भु

२४

वः स्वः भूमे इहागच्छ इह तिष्ठ। भौमवामपार्श्वे भूमिं आवाहयामि
इदं विष्णुर्मेधातिथिर्विष्णुर्गायत्री विष्ण्वावाहने वि०। ओं इदं विष्णु
र्विचक्रमे। ओं भूर्भुवः स्वः विष्णो इहागच्छ इह तिष्ठ। बुधवामपा
र्श्वे विष्णुं आवाहयामि॥ इदं श्रेष्ठानि गृत्समद इंद्रस्त्रिष्टुप्। इं
द्रावाहने वि० इंद्रश्रेष्ठानि द्रविणानि धेहि। ओं भूर्भुवः स्वः भो इं
द्र इहागच्छ इह तिष्ठ। गुरुवामपार्श्वे इंद्रं आवाहयामि॥ इंद्रा
णी वृषाकपिरिंद्राणी पंक्तिः। इंद्राण्यावाहने वि०। इंद्राणीमा
सु नारिषु। ओं भूर्भुवः स्वः इंद्राणी इहागच्छ इह तिष्ठ॥ शुक्र
वामपार्श्वे इंद्राणीं आवाहयामि॥ प्रजापते हिरण्यगर्भः प्र
जापतिस्त्रिष्टुप्। प्रजापत्यावाहने वि०। प्रजापते न त्वत्। ओं

२४

भूर्भुवः स्वः भो प्रजापते इहागच्छ इह तिष्ठ। शनिवामपार्श्वे प्रजाप
तिं आवाहयामि॥ आयंगौः सार्पराज्ञिः सर्पा गायत्री सर्पावाहने
वि०। आयंगौः पृश्निरक्रमीत्। ओं भूर्भुवः स्वः भो सर्पाः इहागच्छ
इह तिष्ठत। राहुवामपार्श्वे सर्पान् आवाहयामि॥ ब्रह्मजज्ञानं वामदे
वो ब्रह्मा त्रिष्टुप् ब्रह्मावाहने वि०। ब्रह्मजज्ञानं०। ओं भूर्भुवः स्वः
भो ब्रह्मन् इहागच्छ इह तिष्ठ। केतुवामपार्श्वे ब्रह्माणं आवाहयामि०
इति प्रत्यधिदेवताः॥ ॥गणानां त्वा गृत्समदो गृत्समदो गणपतिर्जग
ती विनायकावाह०। ओं गणानां त्वा० ओं भूर्भुवः स्वः भो विनायक
इहागच्छ इह तिष्ठ। राहोरुत्तरतः गणपतिं आवाहयामि०। जातवे
दसे कश्यपो दुर्गा त्रिष्टुप् दुर्गावाहने वि०। जातवेदसे सुनवाम सो
मं। ओं भूर्भुवः स्वः भो दुर्गे इहागच्छ इह तिष्ठ। शनेरुत्तरतः दुर्गां आ

वाहयामि॥ तववायोऋग्वांगिरसोवायुर्गायत्रीवाय्वावाहने वि०
तववायपरतस्पते ओंभूर्भुवः स्वः वायोइहागच्छ इहतिष्ठ रवेरू
त्तरतः वायुंआवाहयामि० आदित्यत्वस्यवत्स आकाशो गायत्री
आकाशावाहनेवि० आदित्यत्वस्यरेतसः। ओंभूर्भुवः स्वः आका
शइहागच्छइहतिष्ठ। राहुर्दक्षिणातः आकाशंआवाहयामि॥
एषोउषाप्रस्कण्वोग्निर्नौगायत्री। अग्न्यावाहनेवि० एषोउषाअ
पूर्व्या ॐभूर्भुवःस्वः अग्निनोइहागच्छतं इहतिष्ठतंकेतुर्दक्षिण
तः अग्निनौआवाहयामि॥ इतिपंचलोकपालपूजनं॥ ॥क्षेत्र
स्यवामदेवः क्षेत्राधिपतिरनुष्टुप्। क्षेत्रपालावाहने वि०। क्षेत्र
स्यपतिनावयं। ॐभूर्भुवः स्वः भोक्षेत्राधिपतेइहागच्छइहति
ष्ठ। उत्तरेक्षेत्रपालं आवाहयामि॥ वातोष्पतेवसिष्ठोवास्तोष्प

तिस्त्रिष्टुप्वास्तोष्पत्यावाहनेविनियोगः॥ वास्तोष्पते प्रतिजा
नीह्यस्मान्० ओंभूर्भुवःस्वः भोवास्तोष्पतेइहागच्छ इहतिष्ठ
उत्तरेवास्तोष्पतिंआवाहयामि॥ सूर्यस्यपूर्वेशेषायनमः शे
षंआवाहयामि॥ सोमस्याग्रेवासुकयेनमः वासुकिंआवाहया
मि॥ भौमस्याग्रेतक्षकायनमः तक्षकंआवाहयामि। बुधोत्त
रेककैटायनमः कर्कोटकंआवाहयामि॥ शुक्रोत्तरेमहापद्मा
यनमः महापद्मंआवाहयामि॥ शनिपश्चिमेशंखपालायन
मः शंखपालंआवाहयामि। राहोः पुरः कंबलायनमः कंबलं
आवाहयामि। केतोःपुरः कुलिकायनमः कुलिकंआवाहया
मि। ततोबहिः पूर्वेअग्न्यादिसप्तनक्षत्रेभ्योनमः अग्न्या
दिसप्तनक्षत्राण्यावाहयामि॥ विष्कंभादिसप्तयोगेभ्योनमः

गुरु रुनरेपद्मायनमः

